* ओ३म् *

गुरुकुलग्रन्थावलिः ।

संशोधितः

साहित्य-दर्पणः

श्री मद्विश्वनाथ-कविराज प्रणीतः

गुरुकुलमुख्याधिष्ठातृ--महोदयनिदेशेन

नन्दलाल-प्रबन्धेन

काङ्गड़ी गुरुकुल यन्त्रालये

मुद्रितः ।

१९७८ वैक्रमाब्दे   ३८ दयानन्दाब्दे

प्रथमावृत्तौ ५०० पुस्तकानि | सन् १९२१ ई० | मूल्यम् २)

* ओ३म् *

श्रीमद्विश्वनाथकविराजप्रणीतः

साहित्यदर्पणः ।

श्रीमद्रामचरणतर्कवागीशकृतया विवृत्यानुगतः ।

प्रथमः परिच्छेदः ।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमुख्यमाधत्ते—

शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः संततमर्थानखिलान्प्रकाशयतु ॥ १ ॥

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥ २ ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव ।
उक्तं च—

'धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥' इति ।

किंच काव्याद्धर्मप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना। 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्यधर्मफलाननुसंधानात्। मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च। चतुर्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसंदोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्।

किंच। काव्यस्योपादेयत्वमग्निपुराणेऽप्युक्तम्—

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा॥' इति।

'त्रिवर्गसाधनं नाट्यम्' इति च। विष्णुपुराणेऽपि—

'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥' इति।

तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते। एतेनाभिधेयं च प्रदर्शितम्। तत्किंस्वरूपं तावत्काव्यमित्यपेक्षायां कश्चिदाह— 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति। एतच्चिन्त्यम्। तथाहि यदि दोषरहितस्यैव काव्यत्वं तदा—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥' इति ।

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात् । प्रत्युत ध्वनित्वेनोत्तमकाव्यतास्याङ्गीकृता । तस्मादव्याप्तिर्लक्षणदोषः । ननु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्व एवेति चेत्तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आकृष्यमाणमिदं काव्यमकाव्यं वा किमपि न स्यात् । न च कंचिदेवांशं काव्यस्य दूषयन्तः श्रुतिदुष्टादयोदोषाः, किं तर्हि सर्वमेव काव्यम् । तथाहि—काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते । अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थापि न स्यात् । यदुक्तं ध्वनिकृता—

'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥' इति ।

किंचैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसंभवात् ।

नन्वीषदर्थे नञः प्रयोग इति चेत्तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात् । सति संभवे 'ईषद्दोषौ' इति चेत्, एतदपि काव्यलक्षणेऽवाच्यम् । रत्नादिलक्षणे कीटानुवेधादिपरिहारवत् । नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किंतूपादेयतारतम्यमेव कर्तुम्, तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य । उक्तं च—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥' इति ।

किंच शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम् । गुणानां रसैकधर्मत्वस्य 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' इत्यादिना तेनैव प्रतिपादितत्वात् । रसाभिव्यञ्जकत्वेनोपचारत उपपद्यत इति चेत्, तथाप्ययुक्तम् । तथाहि—तयोः काव्यस्वरूपेणाभिमतयोः शब्दार्थयो रसोऽस्ति नवा, नास्ति चेत्, गुणवत्त्वमपि नास्ति । गुणानां तदन्वयव्यतिरेकानुविधायित्वात् । अस्ति चेत्, कथं नोक्तं रसवन्ताविति विशेषणम् । गुणवत्त्वान्यथानुपपत्त्यैतल्लभ्यत इति चेत्, तर्हि सरसावित्येव वक्तुं युक्तम्, न सगुणाविति । नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते । ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्याविति अभिप्राय इति चेत्, न । गुणाभिव्यञ्जकशब्दार्थवत्त्वस्य काव्ये उत्कर्षमात्राधायकत्वम्, न तु स्वरूपाधायकत्वम् । उक्तं हि—काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, अलंकाराः कटककुण्डलादिवत्, इति । एतेन 'अनलंकृती पुनः क्वापि' इति यदुक्तम्, तदपि परास्तम् । अस्यार्थः—सर्वत्र सालंकारौ क्वचित्त्वस्फुटालंकारावपि शब्दार्थौ काव्यमिति । तत्र सालंकारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् । एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवितकारोक्तमपि परास्तम् । वक्रोक्तेरलंकाररूपत्वात् ।

'अदोषं गुणवत्काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥'

इत्यादीनामपि काव्यलक्षणत्वमपास्तम्। यत्तु ध्वनिकारेणोक्तम्—'काव्यस्यात्मा ध्वनिः—' इति, तत्किं वस्त्वलंकाररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा । उत रसादिरूपमात्रो वा । नाद्यः । प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेदोमिति ब्रूमः। ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा, तदा—

उदयति दिनकरबिम्बे विलयति तमसाश्रये क्वचिज्झटिति
सरसामुपरि बभूवे मञ्जुलगुञ्जाभिरञ्जसा मधुपैः ।

इत्यादौ पद्मविकासरूपस्य वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत्, न। अत्रापि रसोपकारकतैवेति ब्रूमः। अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यंग्यावगतेरपि काव्यत्वं स्यात् । अस्त्विति चेत्, न रसवत एव काव्यत्वाङ्गीकारात् । काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारा वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रादीनां विनेयानां रामादिवत्प्रवर्तितव्यम्, न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरंतनैरप्युक्तत्वात् । तथा चाग्नेयपुराणेऽप्युक्तम्—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति । व्यक्तिविवेककारेणाप्युक्तम्—'काव्यस्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद्विमतिः' इति । ध्वनिकारेणाप्युक्तम्—'नहि कवेरितिवृत्तमात्रनिर्वाहेणात्मपदलाभः । इतिहासादेरेव तत्सिद्धेः' इत्यादि । ननु तर्हि प्रबन्धान्तर्वर्तिनां केषांचिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्, न । रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात् । यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभा-

वादलंकारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसा-
म्याद्गौण एव । यत्तु वामनेनोक्तम् -'रीतिरात्मा काव्यस्य'
इति, तन्न । रीतेः संघटनाविशेषत्वात् । संघटनायाश्चावयव
संस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात् । यच्च ध्वनिकारे-
णोक्तम्—

'अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।

वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥' इति ।

अत्र वाच्यात्मत्वं 'काव्यस्यात्मा ध्वनिः—' इति स्ववचोवि-
रोधादेवापास्तम् ।

तत्किंस्वरूपं काव्यमित्युच्यते—

वाक्यं रसात्मकं काव्यं

रसस्वरूपं निरूपयिष्यामः । रस एवात्मा साररूपतया
जीवनाधायको यस्य । तेन विना तस्य काव्यत्वाभावस्य प्रति-
पादितत्वात् । 'रस्यते इति रसः' इति व्युत्पत्तियोगाद्भावतदा
भासादयोऽपि गृह्यन्ते । तत्र रसो यथा—

बलातिरेकोद्धतबाहुवर्चसा तपःप्रभावोज्ज्वलचण्डतेजसा
क्षणेन रामेण शरैर्विदारिता पपात भूमौ द्विषतो वरूथिनी ।

अत्र वीरो रसः

भावो यथा महापात्रराघवानन्दसांधिविग्रहिकाणाम्—

'यस्यालीयत शल्कसीम्नि जलधिः, पृष्ठे जगन्मण्डलं,
दंष्ट्रायां धरणी, नखे दितिसुताधीशः, पदे रोदसी, ।
क्रोधे क्षत्रगणः, शरे दशमुखः, पाणौ प्रलम्बासुरो,
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः ॥'

अत्र भगवद्विषया रतिर्भावः ।

रसाभासो यथा

प्रचण्डनखरोत्कृत्त-गण्डखण्डनदण्डिता ।
वेतण्डमण्डली पिष्टा क्षणेन हरिभूभुजा ॥

अत्र वीररसस्तिर्य्यग्गतः

दोषाः पुनः काव्ये किंस्वरूपा इत्युच्यन्ते—

दोषास्तस्यापकर्षकाः ।

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते । एषां विशेषोदाहरणानि वक्ष्यामः ।

गुणाः किंस्वरूपा इत्युच्यन्ते—

उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः ॥ ३ ॥

गुणाः शौर्यादिवत्, अलंकाराः कटककुण्डलादिवत्, रीतयोऽवयवसंस्थानविशेषवत्, देहद्वारेणेव शब्दार्थद्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते । इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दार्थयोरुपचर्यते । अतश्च, गुणाभिव्यञ्जकाः शब्दा रसस्योत्कर्षकाः—' इत्युक्तं भवतीति प्रागेवोक्तम् एषामपि विशेषोदाहरणानि वक्ष्यामः ।

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थापन-
परमाचार्यकविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्गसान्धि
विग्रहिकमहापात्रश्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे
काव्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः ।

द्वितीयः परिच्छेदः ।

वाक्यस्वरूपमाह—

वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।

योग्यता पदार्थानां परस्परसंबन्धे बाधाभावः । पदोच्चयस्यैतदभावेऽपि वाक्यत्वे 'वह्निना सिञ्चति' इत्याद्यपि वाक्यं स्यात् । आकाङ्क्षा प्रतीतिपर्यवसानविरहः । स च श्रोतुर्जिज्ञासारूपः । निराकाङ्क्षस्य वाक्यत्वे 'गौरश्वः पुरुषो हस्ती' इत्यादीनामपि वाक्यत्वं स्यात् । आसत्तिर्बुद्ध्यविच्छेदः । बुद्धिविच्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सगतिः स्यात् । अत्राकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात् ।

वाक्योच्चयो महावाक्यम्

योग्यताकाङ्क्षासत्तियुक्त इत्येव ।

इत्थं वाक्यं द्विधा मतम् ॥ १ ॥

इत्थमिति वाक्यमहावाक्यत्वेन । उक्तं च—

'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥' इति ।

तत्र वाक्यं यथा—'शून्यं वासगृहं—' इत्यादि । महावाक्यं यथा—रामायणमहाभारतरघुवंशादि ।

पदोच्चयो वाक्यमित्युक्तम्, तत्र किं पदलक्षणमित्यत आह

वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

यथा—घटः। प्रयोगार्हेति प्रातिपदिकस्य व्यवच्छेदः। अनन्वितेति वाक्यमहावाक्ययोः। एकेति साकाङ्क्षानेकपदवाक्यानाम्। अर्थबोधका इति कचटतपेत्यादीनाम्। वर्णा इति बहुवचनमविवक्षितम्।

अर्थो वाच्यश्च लक्ष्यश्च व्यंग्यश्चेति त्रिधा मतः॥ २॥

एषां स्वरूपमाह—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मत।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥३

ता अभिधाद्याः।

तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा।

उत्तमवृद्धेन मध्यमवृद्धमुद्दिश्य 'गामानय' इत्युक्ते तं गवानयनप्रवृत्तमुपलभ्य बालोऽस्य वाक्यस्य सास्नादिमत्पिण्डानयनमर्थः' इति प्रथमं प्रतिपद्यते। अनन्तरं च 'गां बधान, अश्वमानय' इत्यादावावापोद्वापाभ्यां गोशब्दस्य 'सास्नादिमानर्थः' आनयनपदस्य च 'आहरणमर्थः' इति संकेतमवधारयति। क्वचिच्च प्रसिद्धार्थपदसमभिहारात्। यथा—'इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्र। क्वचिदाप्तोपदेशात्। यथा अयमश्वशब्दवाच्यः' इत्यत्र तं च संकेतितमर्थं बोधयन्ती शब्दस्य शक्त्यनन्तरिता शक्तिरभिधानाम।

संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च॥ ४॥

जातिर्गोपिण्डादिषु गोत्वादिका। गुणो विशेषाधानहेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्ण-

गवादिभ्यो व्यावर्तयन्ति। द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रयणान्तादिपूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः। एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते, न व्यक्तौ। आनन्त्यव्यभिचारदोषापातात्।

अथ लक्षणा—

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥५॥

"कलिङ्गः साहसिकः" इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसंभवन्यया शब्दशक्त्या स्वसंयुक्तान्पुरुषादीन्प्रत्याययति, यया च 'गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात्प्रकृतेऽसंभवन्स्वस्य सामीप्यादिसंबन्धसंबन्धिनं तटादिं बोधयति, सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव। उत्तरत्र 'गङ्गातटे घोषः' इति प्रतिपादनालभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनं हेतुं विनापि यस्यकस्यचित्सबन्धिनो लक्षणेऽतिप्रसङ्गः स्यात्, इत्युक्तम्—'रूढेः प्रयोजनाद्वापि' इति

केचित्तु 'कर्मणि कुशलः' इति रूढावुदाहरन्ति। तेषामयमभिप्रायः-कुशांल्लातीति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसंभवन्विवेचकत्वादिसाधर्म्यं संबन्ध-संबन्धिनं-दक्षरूपमर्थं बोधयति। तदन्ये न मन्यन्ते। कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य

मुख्यार्थत्वे 'गौः शेते' इत्यत्रापि लक्षणा स्यात्। 'गमेर्डोः' (उणादि-२।६७) इति गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽप्रयोगात् ॥

तद्भेदानाह—

मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये ।

स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा ॥९॥

रूढावुपादानलक्षणा यथा—'श्वेतो धावति'। प्रयोजने यथा—"कुन्ताः प्रविशन्ति"। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्चाचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसंबन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते। पूर्वत्र प्रयोजनाभावाद्रूढिः। उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्। लक्षणलक्षणायां तु परस्यैवोपलक्षणमित्यनयोर्भेदः। इयमेवाजहत्स्वार्थेत्युच्यते ॥

अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।

उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥ ७ ॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा—'कलिङ्गः साहसिकः', 'गङ्गायां घोषः' इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः।

यथा वा—

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धये उपकृतादयः शब्दा आत्मानमर्पयन्ति। अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधो वैपरीत्यलक्षणः संबन्धः, फलमपकारातिशयः। इयमेव जहत्स्वार्थेत्युच्यते ॥

आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।

ताः पूर्वोक्ताश्चतुर्भेदलक्षणाः।

विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् ॥ ८॥
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका।

विषयिणा अनिगीर्णस्य विषयस्य तेनैव सह तादात्म्यप्रतीतिकृत्सारोपा। इयमेव रूपकालंकारस्य बीजम्। रूढावुपादानलक्षणा सारोपा यथा—'अश्वः श्वेतो धावति'। अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा—'एते कुन्ताः प्रविशन्ति।' अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात्सारोपत्वम्। रूढौ लक्षणलक्षणा सारोपा यथा—'कलिङ्गः पुरुषो युध्यते'। अत्र पुरुषकलिङ्गशब्दयोराधाराधेयभावः संबन्धः। प्रयोजने यथा—आयुर्घृतम्। अत्रायुष्कारणमपि घृतं कार्यकारणभावसंबन्धसंबन्ध्यायुस्तादात्म्येन प्रतीयते। अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्।

यथा वा—राजकीये पुरुषे गच्छति 'राजासौ गच्छति' इति। अत्र स्वस्वामिभावलक्षणः संबन्धः। यथा वा—अग्रमात्रेऽवयवभागे 'हस्तोऽयम्'। अत्रावयवावयविभावलक्षणः संबन्धः

'ब्राह्मणोऽपि तक्षासौ'। अत्र तात्कर्म्यलक्षणः। इन्द्रार्थासु स्थूणासु 'अमी इन्द्राः'। अत्र तादर्थ्यलक्षणः संबन्धः। एवमन्यत्रापि। निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत्साध्यवसाना। अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव॥

सादृश्येतरसंबन्धाः शुद्धास्ताः सकला अपि॥ ९॥
सादृश्यात्तु मता गौण्यस्तेन षोडश भेदिताः।

ताः पूर्वोक्ता अष्टभेदा लक्षणाः। सादृश्येतरसंबन्धाः कार्यकारणभावादयः। अत्र शुद्धानां पूर्वोदाहरणान्येव। रूढावुपादानलक्षणा सारोपा गौणी यथा—'एतानि तैलानि हेमन्ते सुखानि'। अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिषु स्नेहेषु वर्तते। प्रयोजने यथा—राजकुमारेषु तत्सदृशेषु। च गच्छत्सु 'एते राजकुमारा गच्छन्ति'। रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—'तैलानि हेमन्ते सुखानि'। प्रयोजने यथा—'राजकुमारा गच्छन्ति'। रूढौ लक्षणलक्षणा सारोपा गौणी यथा—'राजा गौडेन्द्रं कण्टकं शोधयति'। प्रयोजने यथा—'गौर्वाहीकः'। रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा—'राजा कण्टकं शोधयति'। प्रयोजने यथा—'गौर्जल्पति'।

अत्र केचिदाहुः—गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते, ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति। तदयुक्तम्। गोशब्दस्यागृहीतसंकेतं वाहीकार्थमभिधातुमशक्यत्वाद् गोशब्दार्थमात्रबोधनाच्च। अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थापनाभावात्।

अन्ये च पुनर्गोशब्देन वाहीकार्थो नाभिधीयते। किंतु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते। तदप्यन्ये न मन्यन्ते। तथाहि—अत्र गोशब्दाद्वाहीकार्थः प्रतीयते, न वा। आद्ये गोशब्दादेव वा। लक्षिताद्वा गुणादविनाभावद्वारा। तत्र न प्रथमः। वाहीकार्थस्यासंकेतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासंभवात्। शाब्दी ह्याकांक्षा शब्देनैव पूर्यते। न द्वितीयः। यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयेत, तदास्य वाहीकशब्दस्य च सामानाधिकरण्यमसंगतं स्यात्।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसंबन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयं च गुणयोगाद्गौणीत्युच्यते। पूर्वा तूपचारामिश्रणाच्छुद्धा। उपचारो हि नामात्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम्। यथा—'अग्निमाणवकयोः'। शुक्लपटयोस्तु नात्यन्तभेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा।

व्यङ्ग्यस्य गूढागूढत्वाद्द्विधा स्युः फललक्षणाः ॥१०॥

प्रयोजने या अष्टभेदा लक्षणा दर्शितास्ताः प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोडशभेदाः। तत्र गूढः, वाक्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा—'उपकृतं बहु तत्र—' इति। अगूढः, अतिस्फुटतया सर्वजनसंवेद्यः। यथा—

'उपदिशति मानुषाणां यौवनमद एव ललितानि।'

अत्र 'उपदिशति' इत्यनेन 'आविष्करोति' इति लक्ष्यते। आविष्कारातिशयश्चाभिधेयवत्स्फुटं प्रतीयते।

धर्मिधर्मगतत्वेन फलस्यैता अपि द्विधा।

एता अनन्तरोक्ताः षोडशभेदा लक्षणाः फलस्य धर्मिगतत्वेन धर्मगतत्वेन च प्रत्येकं द्विधाभूत्वा द्वात्रिंशद्भेदाः।

दिङ्मात्रं यथा—

खेदाः सन्तु दृढं, कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा ! हा !! देवि धीरा भव ॥'

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्मिणि लक्ष्ये तस्यैवातिशयः फलम्। 'गङ्गायां घोषः' इत्यत्र तटे शीतत्वपावनत्वरूपधर्मस्यातिशयः फलम्।

तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः ॥११॥

रूढावष्टौ फले द्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः।

किं च—

पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा।

ता अनन्तरोक्ताश्चत्वारिंशद्भेदाः। तत्र पदगतत्वे यथा—'गङ्गायां घोषः'। वाक्यगतत्वे यथा—'उपकृतं बहु तत्र' इति। एवमशीतिप्रकारा लक्षणा॥

अथ व्यञ्जना।

विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ॥१२॥
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।

'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु ययान्योऽर्थो बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ।

तत्र—

अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ॥१३॥

अभिधामूलामाह—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥१४॥

आदिशब्दाद्विप्रयोगादयः ।

उक्तं हि—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' इति ।

'सशङ्खचक्रो हरिः' इति शंखचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते । 'अशंखचक्रो हरिः' इति तद्वियोगेन तमेव । 'भीमार्जुनौ' इति अर्जुनः पार्थः । 'कर्णार्जुनौ' इति कर्णः सूतपुत्रः । 'स्थाणुं वन्दे' इति स्थाणुः शिवः । 'सर्वं जानाति देवः' इति देवो भवान् । 'कुपितो मकरध्वजः' इति मकरध्वजः कामः । 'देवः पुरारिः' इति पुरारिः शिवः । 'मधुना मत्तः पिकः'

इति मधुर्वसन्तः। 'पातु वश्चन्द्रिकामुखम्' इति मुखं सांमुख्यम्। 'विभाति गगने चन्द्रः' इति चन्द्रः शशी। 'निशि चित्रभानुः' इति चित्रभानुर्वह्निः। 'भातिरथाङ्गम्' नपुंसकव्यक्त्या रथाङ्गं चक्रम्। स्वरस्तु वेद एव विशेषप्रतीतिकृन्न काव्य इति तस्य विषयो नोदाहृतः।

इदं च केऽप्यसहमाना आहुः—'स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिकृदेव। उदात्तादिरूपोऽपि मुनेः पाठोक्तदिशा शृंगारादिरसविशेषप्रतीतिकृदेव' इति। एतद्विषये उदाहरणमुचितमेव इति। तन्न। तथाहि—स्वराः काक्वादयः उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति, न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम्। किं च यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः। न च तथा। अत एवाहुः श्लेषनिरूपणप्रस्तावे—'काव्यमार्गे स्वरो न गण्यते' इति च नयः। इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण। आदिशब्दात् 'एतावन्मात्रफला—' इत्यादौ हस्तादिचेष्टादिभिः फलादीनां कमलकोरकाद्याकारत्वम्।

एवमेकस्मिन्नर्थेऽभिधया नियन्त्रिते या शब्दार्थस्यान्यार्थबुद्धिहेतुः शक्तिः साभिधामूला व्यञ्जना।

यथा मम तातपादानां महापात्रचतुर्दशभाषाविलासिनीभुजंगमहाकवीश्वरश्रीचन्द्रशेखरसांधिविग्रहिकाणाम्—

'दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा
प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः।

नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारय-
न्गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥'

अत्र प्रकरणेनाभिधेये उमावल्लभशब्दस्योमानाममहादेवीवल्लभभानुदेवनृपतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते। एवमन्यत्।

लक्षणामूलामाह—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्याद्व्यञ्जना लक्षणाश्रया॥१५॥

'गङ्गायां घोषः' इत्यादौ जलमयाद्यर्थबोधनादभिधायां तटाद्यर्थबोधनाच्च लक्षणायां विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना।

एवं शाब्दीं व्यञ्जनामुक्त्वार्थीमाह—

वक्तृबोद्धव्यवाक्यानामन्यसंनिधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च॥१६॥
वैशिष्ट्यादन्यमर्थं या बोधयेत्सार्थसंभवा!

तत्र वक्तृ-वैशिष्ट्ये प्रस्ताव-वैशिष्ट्ये च—

स क्षत्रियस्त्राणसहस्सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः।
वहन्द्वयीं यद्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम्॥

द्रौपद्युक्ततया तपोद्वाराऽस्त्रलाभस्त्वयाऽवश्यं कर्तव्य इतिध्वन्यते। प्रस्तावः प्रकरणम्। सोऽप्यत्र सहायकः।

बोद्धव्यवैशिष्ट्ये यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्॥

अत्र बोद्धव्यस्य कस्यचिदपकारिणः पुरुषस्य वैशिष्ट्याद्विपरीतार्थोऽभिव्यज्यते।

वाक्यवैशिष्ट्ये यथा—

प्रमोदो जीवितं प्राणाः सर्वमासमहन्तव
इदानीं भूतले नूनमस्पृश्यो नास्ति मत्समः।

दारिद्र्यमापन्नस्य कस्यचित्कुलीनस्योक्तिरियम्। धनभावेऽहंसम्मानितः, सम्प्रतिधनापगमे तु अहमपमानितः। ततो धनस्यैव त्वयादरः कृतो न ममेति ध्वनितम्।

वाच्यवैशिष्ट्ये अन्यसन्निधिवैशिष्ट्ये च यथा—

विविक्तेऽस्मिन्नगे भूयः प्लाविते जन्हुकन्यया
प्रत्यासीदति मुक्तिस्त्वाम्पुरा माभूरुदायुधः।

अत्र गंगासान्निध्याद्योगाभ्यासयोग्योऽयं देश इति ध्वन्यते। वाच्यः अर्थः सोऽप्यत्र—व्यंग्यबोधे साधनीभूतः।

देशवैशिष्ट्ये यथा—

'विविक्तेऽस्मिन्नगेभूय' इत्यत्र पर्वतस्यनिवासतया कथनमर्थबोधनायैव। यथा वा देशप्रस्तावबोद्धव्यानामेकमुदाहरणम्—

स्खलत्किरीटं क्षतपृष्ठपीठं विलोक्य देहम्भवतोऽद्य राजन्।
मन्ये रिपुन्ध्वस्तसमस्तवीरं कृत्वासि विष्टः शिवरं स्वकीयम्॥

कर्णच्छिन्नरथतुरगशरासनं प्रतिज्ञास्मरणेनैव विमुक्तमाणं शिविरमागत्यस्थितं युधिष्ठिरम्प्रति अर्जुनस्य व्यंग्योक्तिरियम् अत्र पूर्वोक्तैर्वैशिष्ट्यैः शत्रुपराहतस्त्वमत्रागत्यस्थितोऽसीत्यर्थो व्यज्यते।

कालवैशिष्ट्ये यथा—

प्रवाति मधुरो वातः प्राची दिगरुणायते
कूजन्ति पक्षिणो वामाः मूढालस्यम्परित्यज ।

प्रभाते ब्रह्मोपासनाकालः, तत्र शय्यायां शयनमपापावहमितिध्वन्यते ।

काकुवैशिष्ट्ये च—

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतम्
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

अत्र मयि न योग्यः खेदः, कुरुषु तु योग्य इति काका प्रकाश्यते ।

चेष्टावैशिष्ट्येन बहवोऽर्था द्योत्यन्ते ।

अल्पवस्तुबोधनाय कनिष्ठकया निर्देशः, उपहाससूचनाय चक्षुःसंकोचः, एवमनेकचिन्हैरनेकेऽर्थाः लोके ध्वन्यन्ते ।

एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् ।

वैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥ १७ ॥

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्यार्थस्य व्यञ्जना यथा—स्खलत्किरीटमित्यादि । लक्ष्यार्थस्य यथा—उपकृतमित्यादि । व्यङ्ग्यार्थस्य यथा—'प्रवाति मधुर' इत्यादि । प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते ।

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यंजकत्वे तदन्यस्य सहकारिता ॥ १८ ॥

यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते, अर्थोऽपि शब्दम् । तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या ।

अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।

शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥१९॥

अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः ।

किं च—

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।

तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥२०॥

अभिधाया एकैकपदार्थबोधनविरमाद्वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः । तदर्थश्च तात्पर्यार्थः । तद्बोधकं च वाक्यमित्यभिहितान्वयवादिनां मतम् ॥

इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः

अथ कोऽयं रस इत्युच्यते:—

विभावेनानुभावेन व्यक्तः संचारिणा तथा ।
उत्साहादिः स्थायिभावो रसतामेति धीमताम् ॥

विभावादयो वक्ष्य ते । सात्त्विकाश्चानुभावरूपत्वान्न पृथगुक्ताः ।

व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसः । न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते ।

तदुक्तं लोचनकारैः—'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद्व्यवहारः' इति । अत्र च उत्साहादिपदोपादानादेव स्थायित्वे प्राप्ते पुनः स्थायिपदोपादानं उत्साहादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम् । ततश्च हासक्रोधादयः शृङ्गारवीरादौ व्यभिचारिण एव ।

तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते' इति ।

अस्य स्वरूपकथनगर्भ आस्वादनप्रकारः कथ्यते—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥ २ ॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ ३ ॥

रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते ।

इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वम् तस्योद्रेको रजस्तमसी अभिभूय आविर्भावः। तत्र हेतुस्तथाविधलौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावाद्युत्साह्लादिप्रकाशसुखचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः—स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः। तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम्। तदाह धर्मदत्तः स्वग्रन्थे—

'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।
तस्मादद्भुतमेवाह कृती नारायणो रसम्॥' इति।

केश्चिदिति। प्राक्तनपुण्यशालिभिः।

यदुक्तम्—

'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससंततिम्।' इति।

यद्यपि 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः।' इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वम्, तथापि 'रसः स्वाद्यते' इति काल्पनिकं भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः। तदुक्तम्—'रस्यमानतामात्रसारत्वात्प्रकाशशरीरादनन्य एव हि रसः' इति। एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगो ज्ञेयः।

नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति। व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्। ततश्च—

'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्॥'

इत्युक्तदिशा घटप्रदीपवद्व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत्, सत्यमुक्तम्। अत एवाहुः—'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद्व्यापारः।' इति। अत एव हि रसनास्वादनचमत्करणादयो विलक्षणा एव व्यपदेशा इति। अभिधादिविलक्षणव्यापारमात्रप्रसाधनग्रहिलैरस्माभी रसादीनां व्यंग्यत्वमुक्तं भवतीति।

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते—

करुणादावपि रसे जायते यत्परं सुखम्॥ २४॥

सचेतसामनुभवः प्रमाणं तत्र केवलम्।

आदिशब्दाद्बीभत्सभयानकादयः। तथाप्यसहृदयानां मुखमुद्रणाय पक्षान्तरमुच्यते—

किंच तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः॥२५॥

नहि कश्चित्सचेतन आत्मनो दुःखाय प्रवर्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्सुखमयत्वमेव।

उपपत्त्यन्तरमाह—

तथा रामायणादीनां भविता दुःखहेतुता।

करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुताप्रसङ्गः स्यात्।

ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह—

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्॥२६॥

शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।

अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्॥२७॥
सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः।

'ये खलु वनवासादयो लोके दुःखकारणानि' इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यतां विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते अतश्च 'लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते' इति लोक एव प्रतिनियमः। काव्ये पुनः 'सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते' इति नियमान्न कश्चिद्दोषः।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते—

अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसो मताः ॥२८॥

तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्यत आह—

न जायते तदास्वादो विनोत्साहादिवासनाम्।

वासना चेदानींतना प्राक्तनी च रसास्वादहेतुः। तत्र य आद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात्। यदि द्वितीया न स्यात्तदा यद्रागिणामपि केषांचिद्रसोद्बोधो न दृश्यते। तन्न स्यात्।

उक्तं च धर्मदत्तेन —

'सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसंनिभाः॥' इति।

ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्याद्युद्बोध इत्युच्यते—

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ॥९॥
तत्प्रभावेण यस्यासन्पाथोधिप्लवनादयः ।
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ॥ १० ॥

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्‍बोध इत्युच्यते—

उत्साहादिसमुद्‍बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलंघनादौ न दुष्यति ॥ ११ ॥

विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्त इत्याह—

परस्य न परस्येति ममेति न ममेति च ॥ १२ ॥
तदास्वादे विभावादेः परिच्छेदो न विद्यते ।

ननु तथापि कथमलौकिकत्वमेतेषां विभावादीनामित्युच्यते-

विभावनादिव्यापारमलौकिकमुपेयुषाम् ॥ १३ ॥
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ।

आदिशब्दादनुभावसंचारणे । तत्र विभावनं उत्साहादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम् । अनुभावनमेवंभूतस्योत्साहादेः समनन्तरमेव रसादिरूपतया भावनम् । संचारणं तथाभूतस्यैव तस्य सम्यक्चारणम् ।

विभावादीनां यथासंख्यं कारणकार्यसहकारित्वे कथं त्रयाणामेव रसोद्‍बोधे कारणत्वमित्युच्यते—

कार्यकारणसंचारिरूपा अपि हि लोकतः ॥ १४ ॥
रसोद्‍बोधे विभावाद्याः कारणान्येव ते मताः ।

ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते—

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ॥ १५ ॥

ततः संमिलितः सर्वो विभावादिः सचेतसाम् ।
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥ १६ ॥

यथा खण्डमरिचादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रपाणकरसे संजायते । विभावादिसंमेलनादिहापि तथेत्यर्थः । ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत्कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्यादित्युच्यते—

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तथा दोषो न विद्यते ॥ १७ ॥

अन्यसमाक्षेपश्च प्रकरणादिवशात् ।

अनुकार्यगतो रस इति वदतः प्रत्याह—

पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा ।
अनुकार्यस्य तद्बोधस्थायिनो न रसो भवेत् ॥ १८ ॥

सीतादिदर्शनादिजो रामादिप्रेमोद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च, तस्मात्कथं रसरूपतामियात् । रसस्यैतद्धर्मत्रितयविलक्षणधर्मकत्वात् ।

अनुकर्तृगतत्वं चास्य निरस्यति—

शिक्षाभ्यासादिमात्रेण राघवादेः सरूपताम् ।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत् ॥ १९ ॥

किं च ।

काव्यार्थभावनेनायमपि सभ्यपदास्पदम् ।

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत्तदा सोऽपि सभ्यमध्य एव गण्यते ।

नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः ॥२०॥

यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिदज्ञातो भवति न ह्ययं तथा प्रतीतिमन्तरेणाभावात् ।

यस्मादेष विभावादिसमूहालम्बनात्मकः ।

तस्मान्न कार्यः

यदि रसः कार्यः स्यात्तदा विभावादिज्ञानकारणक एव स्यात् । ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन् । कारणज्ञानतत्कार्यज्ञानादीनां युगपददर्शनात् । नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा संभवति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः ।

नो नित्यः पूर्वसंवेदनोज्झितः ।

असंवेदनकाले हि न भावोऽप्यस्य विद्यते ॥ २१ ॥

न खलु नित्यवस्तुनोऽसंवेदनकालेऽसंभवः ।

नापि भविष्यन्साक्षादानन्दमयप्रकाशरूपत्वात् ।

कार्यज्ञाप्यविलक्षणभावान्नो वर्तमानोऽपि ॥ २२ ॥

विभावादिपरामर्शविषयत्वात्सचेतसाम् ।

परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥ २३ ॥

न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते ।

तथाभिलापसंसर्गयोग्यत्वविरहान्न च ॥ २४ ॥

सविकल्पकसंवेद्यः

सविकल्पज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता । न तु रसस्य तथा ।

साक्षात्कारतया न च ।

परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसंभवात् ॥ २५ ॥

तत्कथय कीदृगस्य तत्त्वमश्रुतादृष्टपूर्वं निरूपणप्रकारस्ये-
त्याह—

तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ।

तत्किं पुनः प्रमाणं तस्य सद्भावे इत्याह—

प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ॥२६॥

चर्वणा आस्वादनम् । तच्च 'स्वादः काव्यार्थसंभेदादात्मा-
नन्दसमुद्भवः' इत्युक्तप्रकारम् ।

ननु यदि रसो न कार्यस्तत्कथं महर्षिणा 'विभावानुभाव-
व्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति लक्षणं कृतमित्युच्यते—

निष्पत्त्या चर्वणास्यास्य निष्पत्तिरुपचारतः ।

यद्यपि रसाभिन्नतया चर्वणायापि न कार्यत्वं तथापि
तस्य कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते ।

अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे ॥ २७ ॥

तस्य रसस्य । आदिशब्दाल्लक्ष्यत्वादि ।

ननु यदि मिलिता उत्साहादायो रसास्तत्कथमस्य स्वप्रकाश-
त्वं कथं वाखण्डत्वमित्याह—

स्थायित्विज्ञानतादात्म्यादेव यस्माद्रसो भवेत् ।
ततोऽस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति ॥२८॥

यदि उत्साहादिकं प्रकाशशरीरादतिरिक्तं स्यात्तदैवास्य
स्वप्रकाशत्वं न सिध्येत् । न च तथा । तादात्म्याङ्गीकरात् ।
यदुक्तम्— यद्यपि रसानन्यतया चर्वणापि न कार्या तथापि
कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरि-
णतिरूपे उत्साहादिभावेऽपि व्यवहार इति भावः' इति । सुखा-

दितादात्म्याङ्गीकारे चास्माकं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेया इति च । अभिन्नोऽपि स प्रमात्रा वासनोपनीतरशोकादितादात्म्येन गोचरकृतः' इति च । ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वतामुपरि वेदान्तिभिरेव पातनीयो दण्डः । तादात्म्यादेवास्याखण्डत्वम् ।

उत्साहादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्ते । तदुक्तम्—

'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ॥' इति ।

'परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः' इति च ।

अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह—

स्थायिनांबोधका लोके विभावाः काव्यनाट्ययोः ।

ये हि लोके रामादिगतोत्साहादीनामुद्बोधकारणानि रावणादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावा उच्यन्ते ।

तदुक्तं भर्तृहरिणा—

'शब्दोपहितरूपांस्तान्बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन्साधनत्वेन मन्यते ॥'

तद्भेदावाह—

आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।

स्पष्टम् ।

तत्र—

आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात् ॥२९॥

आदिशब्दान्नायिकाप्रतिनायिकादयः । अत्र यस्य रसस्य यो विभावः स तत्स्वरूपवर्णने वक्ष्यते । तत्र नायकः—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।

दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥ ३० ॥

दक्षः क्षिप्रकारी । शीलं सद्वृत्तम् । एवमादिगुणसंपन्नो नेता नायको भवति ।

तद्भेदानाह—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।

धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥ ३१ ॥

स्पष्टम् ।

तत्र धीरोदात्तः—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।

स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥३२॥

अविकत्थनोऽनात्मश्लाघाकरः । महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः । निगूढमानो विनयच्छन्नगर्वः । दृढव्रतोऽङ्गीकृत निर्वाहकः । यथा—रामादिः ।

अथ धीरोद्धतः—

मायापारः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः ।

आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ ३३ ॥

यथा—भीमसेनादिः ।

अथ धीरललितः

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।

कला नृत्यादिका । यथा—रत्नावल्यादौ वत्सराजादिः ।

अथ धीरप्रशान्तः—

सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात् ॥३४॥

यथा—मालतीमाधवादौ माधवादिः ।

अथ प्रतिनायकः—

धीरोद्धतः पापकारी व्यसनी प्रतिनायकः ।

यथ—रामस्य रावणः ।

अथोद्दीपनविभावाः—

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥ १३१ ॥

ते च—

आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ।

चेष्टाद्या इत्याद्यशब्दाद्रूपभूषणादयः । कालादीत्यादिश-ब्दाच्चन्द्रचन्दनकोकिलालापभ्रमरझंकारादयः ।

यो यस्य रसस्योद्दीपनविभावः स तत्स्वरूपवर्णने वक्ष्यते ।

अथानुभावाः—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ॥ १३२ ॥

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ।

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दी-पनकारणैरामादेरन्तरुद्बुद्धं प्रेमादिकं बहिः प्रकाशयन्कार्यमि-त्युच्यते, स काव्यनाट्ययोः पुनरनुभावः ।

अथ सात्त्विकाः—

विकाराः सत्त्वसंभूताः सात्त्विकाः परिकीर्तिताः ॥१३४॥

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः ।

सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः ।
'गोबलीवर्दन्यायेन' इति शेषः ।

के त इत्याह—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ॥१३५॥
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।

तत्र

स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः ॥ १३६ ॥
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ।
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥ १३७ ॥
मदसंमदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः ।
रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ॥ १३८ ॥
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ।
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥ १३९ ॥

क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुः
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः ।
धत्ते कान्तिमिदं च वक्त्रमनयोर्भङ्गेन भिन्नभ्रुवो—
श्चन्द्रस्योद्भटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ।

एवमन्यत् ।

अथ व्यभिचारिणः -

विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः॥१४०॥

स्थिरतया वर्तमाने हि उत्साहादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिणः कथ्यन्ते ।

के त इत्याह:—

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृति-
मतिसहिता व्याधिसंत्रासलज्जा ।
हर्षासूयाविषादाः सधृतिचपलता—
ग्लानिश्चिन्तावितर्काः ॥ १४१ ॥

तत्र निर्वेदः—

तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।
दैन्यचिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥१४२॥

तत्त्वज्ञानान्निर्वेदो यथा—

'मृत्कुम्भवालुकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्तशङ्खोऽयं हन्त चूर्णीकृतो मया ॥'

अथावेगः—

आवेगः संभ्रमस्तत्र हर्षजे पिण्डिताङ्गता ।
उत्पातजे स्रस्तताङ्गे, धूमाद्याकुलताग्निजे ॥१४३

राजविद्रवजादेस्तु शस्त्रनागादियोजनम् ।
गजादेः स्तम्भकम्पादि, पांस्वाद्याकुलतानिलात् ॥१४४
इष्टाद्धर्षाः, शुभोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् ।

तत्र शत्रुजो यथा—

'अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनपेक्ष्य भरताग्रजो यतः ।
त्रक्षकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥'

एवमन्यदूह्यम् ।

अथ दैन्यम् —

दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत् ॥ १४५ ॥

यथा—

वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,
कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य वार्तापि नो ।
यत्नात्संचितनैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥'

अथ श्रमः—

खेदोऽध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः ।

यथा—

'सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥'

अथ मदः—

संमोहानन्दसंभेदो मदो मद्योपयोगजः ॥ १४६ ॥

अमुना चोत्तमः शेते, मध्यो हसति गायति ।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४७ ॥

यथा—

प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः दुर्धियां प्रवतृते परिहासः ॥'

अथ जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥ १४८ ॥

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये— [१]

'णवरिअ तं जुअजुअलं अण्णोण्णं णिहिदसजलमन्थरदिट्ठिम् ।
आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्णम् ॥'

अथोग्रता—

शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १४९ ॥

यथा—

वपुपि वधाय तस्य तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैप भुजः ॥'

अथ मोहः—

मोहो विचित्तताभीतिदुःखावेगानुचिन्तनैः ।
मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५० ॥

(१) केवलं तद्युवयुगल मन्योन्यं निहित-सजल-मन्थर-दृष्टि
आलेख्यार्पितमिव क्षणमात्रं तत्र संस्थितं मुक्तसंगम् ।

यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥'

अथ विबोधः—

निद्रापगमहेतुभ्यो विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५१ ॥

यथा—

इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ।

अथ स्वप्नः—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ १५२ ॥

यथा—

स्वप्नेऽपि वीक्ष्य दशकन्धरमार्तचिन्ता
'हा राम पाहि विवशा' मिति सा रुरोद ॥

अथापस्मारः—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५२ ॥

'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥'

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १५४ ॥

तत्र शौर्यगर्वो यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम् ॥'

अथ मरणम्—

शराद्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

यथा—

अथ दीर्घतमं तमः प्रवेक्ष्यन् सहसा रुग्णरयः स संभ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥

अथालस्यम्—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत् ॥ १५५ ॥

यथा—

श्रान्ताः पर्वतलंघनेन चटको गंगातटे शेरते ।

अथामर्षः-

निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
नेत्ररागशिरःकम्पभ्रूभंगोत्तर्जनादिकृत् ॥ १५६ ॥

यथा—

'प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम् ॥'

अथ निद्रा—

चेतःसंमीलनं निद्रा श्रमक्लममदादिजा ।
जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥ १५७

यथा—

'सार्थकानर्थकपदं ब्रुवन् मन्थराक्षरम् ।
निद्रार्धमीलिताक्षो सौ मयादृष्टोनिशागमे ॥'

अथावहित्था—

भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी ॥१५८॥

यथा—

'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥'

यथा अथौत्सुक्यम्—

इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता ।
चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत् ॥ १५९ ॥

कष्टं भोः—

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतो न यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये हा ! हा !! प्रिये क्वासि मे ॥

अथोन्मादः—

चित्तसंमोह उन्मादः कामशोकभयादिभिः ।
अस्थानहासरुदितगीतप्रलपनादिकृत् ॥ १६० ॥

यथा —

'भ्रातर्द्विरेफ भवता भ्रमता समन्ता-
त्प्राणाधिकःकिल सखा मम वीक्षितः किम् ।

(झंकारमनुभूय सानन्दम् ।)

ब्रूपे किमोमिति सखे कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशोयम् ॥'

अथ शङ्का—

परक्रौर्यात्मदोषाद्यैः शंकानर्थस्यतर्कणम् ।
वैवर्ण्यकम्पवैस्वर्यपार्श्वालोकास्यशोषकृत् ॥ १६१ ॥

यथा—

न मृगः खलु कोप्ययं जिघांसुः
स्खलति ह्यत्र तथा भृशं मनो मे ।
विमलं कलुषीभवच्च चेतः
कथयत्येव हितैषिणं रिपुं वा ।

अथ स्मृतिः—

सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत् ।
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥ १६२ ॥

यथा—

रामः । (सास्रम्) स्मरामि हन्त स्मरामि
जीवत्सु तातपादेषु नूतने दारसंग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसागताः ॥

अथ मतिः—

नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः ।
स्मेरता धृतिसंतोषौ बहुमानश्च तद्भवाः ॥ १६३ ॥

यथा—

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथ व्याधिः—

व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

तत्र दाहमयत्वे भूमीच्छादयः । शैत्यमयत्वे उत्कम्पनादयः । स्पष्टमुदाहरणम् ।

अथ त्रासः—

निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १६४ ॥

यथा—

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयत् ।

अथ व्रीडा—

धाष्ट्र्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ।

अथ हर्षः—

हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥ १६५

यथा—

समीक्ष्य पुत्रस्य चिरात्पिता मुखं निधानकुम्भस्य यथैव दुर्गतः
मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्छितो यथा ॥

अथासूया—

असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ।
दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत् ॥ १६६ ॥

यथा—

अथ तत्र पाण्डुतनयेन सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ॥

अथ विषादः—

उपायाभावजन्मा तु विषादः सत्वसंक्षयः ।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत् ॥ १६७ ॥

यथा—

भास्करसूनावस्तं याते जाते च पाण्डवोत्कर्षे ।
दुर्योधनस्य जीवित कथमिव नाद्यापि निर्यासि ॥

अथ धृतिः—

ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः ।
सौहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥१६८॥

यथा मम—

कृत्वा दीननिपीडनां निजजने बद्ध्वा वचोविग्रहं
नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः ।
द्रव्यौघाः परिसंचिताः खलु मया यस्याः कृते सांप्रतं
नीवाराञ्जलिनाऽपि केवलमहो सेयं कृतार्था तनुः ॥

अथ चपलता—

मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः ।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १६९ ॥

अहितव्रनपापात्मन्मैवं मे दर्शयाननम्
आत्मानं हन्तुमिच्छामि येन त्वमसि भावितः ।
प्रल्हादम्प्रति हिरण्यकशिपोरुक्तिः

अथ ग्लानिः—

अत्यायासमनस्तापक्षुत्पिपासादिसंभवा ।
ग्लानिर्निष्प्राणताकम्पकार्यानुत्साहतादिकृत् ॥१७०

यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥'

अथ चिन्ता—

ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत् ।

(रामः) त्रस्तैकहायनकुरंगविलोलदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ।

अथ तर्कः

तर्को विचारः संदेहाद्भ्रूशिरोङ्गुलिनर्तकः ॥१७१॥

जयेन कच्चिद्विरमेदयं रणाद्भवेदपि स्वस्ति चराचराय वा
तताप कीर्णा नृपसूनुमार्गणैरिति प्रतर्काकुलिता पताकिनी ।

उत्साहाद्यात्रनियते रसे स्युर्व्यभिचारिणः ।

उत्साहो हास उत्पद्यमानो व्यभिचार्येव । व्यभिचारिल-
क्षणयोगात् । तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।', इति ।
तत्कस्य स्थायिनः कस्मिन्रसे संचारित्वमित्याह—

शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः ॥ १७२॥

शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेयं यथा भावितबुद्धिभिः ॥ १७३ ॥

अथ स्थायिभावः—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादांकुरकन्दोऽसौ भावः स्थायीति संमतः ॥

यदुक्तम्—

'सक्मूत्रवृत्त्या भावानामन्येषामनुगामकः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥, इति ।

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ ७४

अथ रसाः

अथ हास्यः—

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥२१४॥
विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः ।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥ २१५ ॥
अनुभावोऽक्षिसंकोचवदनस्मेरतादयः ।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥२१६
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च ।
नीचानामपहसितं तथातिहसितं तदेष षड्भेदः ॥ २१७
ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् ।
किंचिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥ २१८ ॥
मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम् ।
अपहसितं सास्राक्षं विक्षिप्ताङ्गं च भवत्यतिहसितम् ॥

यथा—

'गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च ।
अमी समाघ्राय च तर्कवादान्समागताः कुक्कुटमिश्रपादाः ॥,

अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः ।

अत्र च—

यस्य हासः स चेत्क्वापि साक्षान्नैव निबध्यते ।
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते ॥ २२० ॥
अभेदेन विभावादिसाधारण्यात्प्रतीयते ।
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ॥ २२१ ॥

एवमन्येष्वपि रसेषु बोद्धव्यम् ।

अथ करुणः—

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥२२२
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥ २२३ ॥
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलयनानि च ॥ २२४ ॥
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ २२५ ॥

शोच्यं विनष्टबन्धुप्रभृति

यथा मम राघवविलासे—

विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ॥'

अत्र हि रामवनवासजनितशोकार्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः ।

अस्य करुणविप्रलम्भाद्भेदमाह—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।
विप्रलम्भे रतिः स्थायी पुनः संभोगहेतुकः ॥ २२६ ॥

अथ रौद्रः—

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥ २२७ ॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव ।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा ॥ २२८ ॥
भ्रूविभङ्गौष्ठनिर्दंशबाहुस्फोटनतर्जनाः ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ॥ २२९ ॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ।
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः ॥ २३० ॥
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः ।

यथा—

'कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥'

अस्य युद्धवीराद्भेदमाह—

रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः ॥ २३१ ॥

अथ वीरः—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥ २३२ ॥

आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ॥२३३॥
संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्॥२३४॥

स च वीरो दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः । तत्र दानवीरो यथा परशुरामः—

'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति ।

अत्र परशुरामस्य त्यागे उत्साहः स्थायिभावः संप्रदानभूतः ब्राह्मणैरालम्बनविभावैः सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावैरनुभावितोहर्षधृत्यादिभिः संचारिभिः पुष्टिं नीतो दानवीरतां भजते ।

धर्मवीरो यथा युधिष्ठिरः—

'राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्माय सदोद्यतम् ॥'

युद्धवीरो यथा श्रीरामचन्द्रः—

'भो लंकेश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतम् ।
नैवं चेत्खरदूषणत्रिशिरसां कण्ठासृजा पंकिलः
पत्री नैष सहिष्यते ममधनुर्ज्याबन्धबन्धूकृतः ॥'

दयावीरो यथा जीमूतवाहनः—

'शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन् ।

एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः ।

अथ भयानकः—

भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥ २३५ ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥ २३६ ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥ २३७ ॥
जुगुप्सावेगसम्मोहसंत्रासग्लानिदीनताः ।
शंकापस्मारसंभ्रान्तिमृत्य्वाद्या व्यभिचारिणः ॥ २३८ ॥

यथा—'नष्टं वर्षवरैः—' इत्यादि ।

अथ बीभत्सः—

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥ २३९ ॥
दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम्
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥ २४० ॥
निष्ठीवनास्यवलननेत्रसंकोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥ २४१ ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।

यथा—

'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥'

अथाद्भुतः—

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ॥ २४२ ॥
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥ २४३ ॥
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ॥ २४४ ॥
वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः ॥

यथा—

'दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥'

अथ शान्तः—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥ २४५ ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ॥ २४६ ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ॥ २४७ ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ॥ २४८ ॥
निर्वेदहर्षस्मरणमतिभूतदयादयः ।

यथा—

रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः ।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे
निःशंकः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति ॥'

पुष्टिस्तु महाभारतादौ द्रष्टव्या ।

निरहंकाररूपत्वाद्दयावीरादिरेषनो ॥ २३८ ॥

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्तित्वाद्याप्तेर्दशनादहंकारोपशमो न दृश्यते । शान्तस्तु सर्वाकारेणाहंकारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति । अतश्च नागानन्दादेः शान्तरसप्रधानत्वमपास्तम् । ननु

'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥'

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात्तत्र संचार्यादीनामभावात्कथं रसत्वमित्युच्यते—

युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन्संचार्यादेः स्थितिश्च न विरुद्धा ॥२५०

यश्चास्मिन्सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः ।

उक्तं हि—

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥'

'सर्वाकारमहंकाररहितत्वं व्रजन्ति चेत् ।
अन्तर्भावमर्हन्ति दयावीरादयस्तथा ॥'

आदिशब्दाद्धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः ।

तत्र देवताविषया रतिर्यथा—

'कदा वाराणस्यामिह सुरधुनीरोधसि वस-
न्वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥'

अथ मुनीन्द्रसंमतो वत्सलः—

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥२५१॥
उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः ।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् ॥ २५२ ॥
पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ।
संचारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥ २५३ ॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः ।

यथा—

'यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलीम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥'

एतेषां च रसानां परस्परविरोधमाह—

आद्यः करुणबीभत्सरौद्रवीरभयानकैः ॥ २५४ ॥
भयानकेन करुणेनापि हास्यो विरोधभाक् ।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ॥ २५५ ॥

रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥ २५६ ॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृंगाररौद्रहास्यभयानकैः ॥ २५७ ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ।

आद्यः शृङ्गारः । एषां च समावेशप्रकारा वक्ष्यन्ते ।

कुतोऽपि कारणात्क्वापि स्थिरतामुपयन्नपि ॥ २५८ ॥
उन्मादादिर्न तु स्थायी न पात्रे स्थैर्यमेति यत् ।

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः ।

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ॥ २५९ ॥
संधिः शबलता चेति सर्वेऽपि रसनाद्रसाः ।

रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादित्यभिप्रायः ।
भावादय उच्यन्ते—

संचारिणः प्रधानानि देवादिविषया रतिः ॥२६०॥
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।

'न भावहीनोऽस्ति रसो, न भावोरसवर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥'

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो, देवमुनिगुरुनृपादिविषया च रतिरुद्बुद्धमात्रा, विभावादिभिरपरिपुष्टतया रसरूपतामनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः । तत्र व्यभिचारी

यथा—'एवंवादिनि देवर्षौ' इत्यादिः । अत्रावहित्था ।

देवविषया रतिर्यथा मुकुन्दमालायाम्—

'दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ।
अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥'

मुनिविषया रतिर्यथा—

'विलोकनेनैव तवामुना मुने कृतः कृतार्थोऽस्मि निवर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते ॥'

राजविषया रतिर्यथा मम—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपंकिलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥"

उद्रेकः कस्यचित्क्वापि तथा संचारिणो रसे ।

अथ रसाभासभावाभासौ—

अनौचित्यप्रवृत्तत्व आभासो रसभावयोः ॥ २६२ ॥

अनौचित्य चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे त्वेकदेशयोगित्वोपलक्षणपरं बोध्यम् । तच्च बालव्युत्पत्तये एकदेशतो दृश्यते—

शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे ॥ २६५ ॥
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ।

रौद्राभासो यथा—

'रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः ।
आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्तय-
न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः ॥

भयानकाभासो यथा—

'अशक्नुवन्सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः ॥'

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः । एवमन्यत्र ।

भावाभासो लज्जादिके तु वेश्यादिविषये स्यात् ॥२६६॥

स्पष्टम् ।

भावस्य शान्तावुदये संधिमिश्रितयोः क्रमात् ।
भावस्य शान्तिरुदयः संधिः शबलता मता ॥२६७॥

यथा—

चञ्चत्पञ्चशिखण्डमण्डनमसौ मुग्धप्रगल्भ शिशु-
र्गम्भीरं च मनोहरं च सहजश्रीलक्ष्म रूपन्दधत् ।
द्राग्दृष्टोऽपि हरत्ययं मम मनः सौन्दर्यसारश्रिया
हन्तव्यस्तु तथापि नाम धिगहो वीरव्रतक्रूरताम् ॥

अत्रौग्र्यस्य शान्तिः निर्वेदस्य चोदयः । सन्धेरुदाहरणम् ।

अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा
ववितथमदाध्माते रोषान्मुनावभिधावति
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात्पाणिः पादोपसंग्रहणाय च ।

शबले—राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।
आतंकाद्विकलन्द्रुतं करुणया विक्षोभितं विस्मयात्
क्रोधेन ज्वलितम्मुदा विकसितश्चेतः कथं वर्तते ॥

चतुर्थः परिच्छेदः

अथ काव्यभेदमाह—

काव्यं ध्वनिर्गुणीभूतव्यंग्यं चेति द्विधा मतम्।

तत्र

वाच्यातिशायिनि व्यंग्ये ध्वनिस्तत्काव्यमुत्तमम्॥ १॥

वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्।

भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥२॥

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम्। विवक्षितान्यपरवाच्यस्त्वभिधामूलः। अत एवात्र वाच्यं विवक्षितम् अन्यपरं व्यंग्यनिष्ठम्।

अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यंग्यार्थस्य प्रकाशकः। यथा—प्रदीपो घटस्य। अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः।

अविवक्षितवाच्यस्य भेदावाह—

अर्थान्तरं संक्रमिते वाच्येऽत्यन्तं तिरस्कृते।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति॥ ३॥

अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः। यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसंक्रमितत्वादर्थान्तरसंक्रमितवाच्यत्वम्।

यथा—

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

यत्र पुनः स्वार्थं सर्वथा परित्यजन्नार्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतवाच्यत्वादत्यन्ततिरस्कृतवाच्यत्वम् ।

यथा—

'निःश्वासान्ध इवादर्शश्च न्द्रमा न प्रकाशते ।'

अत्रान्धशब्दो मुख्यार्थे बाधितेऽप्रकाशरूपमर्थं बोधयति । अप्रकाशातिशयश्च व्यंग्यः । अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसंक्रमितवाच्यत्वम् ।

विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः ।
असंलक्ष्यक्रमो यत्र व्यंग्यो लक्ष्यक्रमस्तथा ॥ ४ ॥

विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यंग्यः संलक्ष्यक्रमव्यंग्यश्चेति द्विविधः ।

अत्राद्यो रसभावादिरेक एवात्र गण्यते ।
एकोऽपि भेदोऽनन्तत्वात्संख्येयस्तस्य नैव यत् ॥ ५ ॥

उक्तस्वरूपो भावादिरसंलक्ष्यक्रमव्यंग्यः । अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात्क्रमोऽवश्यमस्ति, किन्तूत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात्संख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यंग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम् ।

शब्दार्थोभयशक्त्युत्थे व्यंग्येऽनुस्वानसंनिभे ।
ध्वनिर्लक्ष्यक्रमव्यंग्यस्त्रिविधः कथितो बुधैः ॥ ६ ॥

क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यंग्यस्तस्य शब्दशक्त्युद्भवत्वेन, अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात्संलक्ष्यक्रमव्यंग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम्।

तत्र

वस्त्वलंकाररूपत्वाच्छब्दशक्त्युद्भवो द्विधा।

अलंकारशब्दस्य पृथगुपादानादनलंकारं वस्तुमात्रं गृह्यते। तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यंग्यो यथा—

नात्र नं बहुलम्पान्थ नापि धाम सुखावहम्।
यदिनेच्छसि विश्रामं तिष्ठात्रैव निरन्तरम्॥

अलंकाररूपो यथा—'दुर्गालङ्घितविग्रहः—' इत्यादि।

अत्र प्राकरणिकस्योमानाममहादेवीवल्लभभानुदेवनामनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसंबद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते। तदत्र 'उमावल्लभ उमावल्लभ इव' इत्युपमालंकारो व्यंग्यः।

यथा वा—

'अमित्रः समित्रः प्राप्तैरुत्कर्षैर्हर्षद प्रभो।
अहितः सहितः साधुयशोभिरसतामसि॥'

अत्रामित्र इत्यादावपिशब्दाभावाद्विरोधाभासो व्यंग्यः। व्यंग्यस्यालंकार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलंकारत्वमुपचर्यते।

वस्तु वालंकृतिर्वापि द्विधार्थः संभवी स्वतः॥ ७॥
कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट्।
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलंकाररूपकः॥ ८॥

अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ।

स्वतःसंभवी, औचित्याद्बहिरपि संभाव्यमानः । प्रौढोक्त्या सिद्धः, न त्वौचित्येन ।

तत्र दिङ्मात्रमुदाह्रियते—

'दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥'

अनेन स्वतःसंभविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालंकारो व्यज्यते ।

'आपतन्तममुं दूराद्दूरीकृतपराक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ॥'

अत्रोपमालंकारेण स्वतःसंभविना व्यञ्जकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते ।

'रजनीषु विमलभानोः करजालेन प्रकाशितं वीर ।
धवलयति भुवनमण्डलमखिलं तव कीर्तिसंततिः सततम् ॥'

अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्तिसंततेश्चन्द्रकरजालादधिकप्रकाशकत्वेन व्यतिरेकालंकारो व्यंग्यः ।

'दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥'

अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलंकारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते ।

शिखरिणि क नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः
तव यशोधवलान्नृप ! चन्द्रिकाम्पिबति येन चकोरचयः स्वयम् ।

कविनिबद्धं कस्यापि चाटुकृतः प्रौढोक्तिसिद्धेन वस्तुना तव यशश्चन्द्रिकाशुभ्रमित्युपमालंकारो व्यज्यते ।

एषु चालंकृतिव्यञ्जनस्थले रूपणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यम्, न तु रूप्यादीनामित्यलंकृतेरेव मुख्यत्वम् ।

दिङ्मात्रमुदाहृतम्

एकः शब्दार्थशक्त्युत्थे

उभयशक्त्युद्भवे व्यंग्ये एको ध्वनेर्भेदः ।

यथा—

'हिममुक्तचन्द्ररुचिरः सपद्मको
मदयन्द्विजाञ्जनितमीनकेतनः ।
अभवत्प्रसादितसुरो महोत्सवः
सुखिनो जनस्य स मदाय माधवः ॥'

अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालंकारो व्यङ्ग्यः । एवं च व्यंग्यभेदादेव व्यञ्जकानां काव्यानां भेदः ।

तदष्टादशधा ध्वनिः ॥ ६ ॥

अविवक्षितवाच्योऽर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यंग्यत्वेनैकः । संलक्ष्यक्रमव्यंग्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेत्यष्टादशभेदो ध्वनिः । एषु च—

वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः ।

तत्रार्थान्तरसंक्रमितवाच्यो ध्वनिः पदगतो यथा—

'धन्यः स एव मनुजो नयने यस्यैव नयने च ।
याता यस्य हि गोचरमेषाखिलतापहारिणी गंगा ॥'

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टनयनपरः ।

वाक्यगतो यथा—

'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥'

अत्र प्रतिपाद्यस्य संमुखीनत्वादेव लब्धे प्रतिपाद्यत्वे त्वामिति पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति । एवं वच्मीत्यनेनैव कर्तरि लब्धेऽस्मीति पुनर्वचनम् । तथा विदुषां समवाय इत्यनेनैव कर्तरि प्रतिपादने सिद्धे पुनर्वच्मीतिवचनमुपदिशामीति वचनविशेषरूपमर्थं लक्षयति । एतानि च स्वातिशयं व्यञ्जयन्ति एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेव कर्तव्यमित्यभिप्रायः । तदेवमयं वाक्यगतोऽर्थान्तरसंक्रमितवाच्यो ध्वनिः ।

अत्यन्ततिरस्कृतवाच्यः पदगतो यथा—'निःश्वासान्धः' इत्यादि । वाक्यगतो यथा—'उपकृतं बहु तत्र' इत्यादि । अन्येषां वाक्यगतत्वे उदाहृतम् ।

पदगतत्वं यथा—

'लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्यन्दमभूदधुना तु ज्वरो महान् ॥'

अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम् । अन्येषां तु तदुपकारित्वमेवेति तन्मूलक एव ध्वनिव्यपदेशः ।

तदुक्तं ध्वनिकृता—

'एकावयवसंस्थेन भूषणेनेव बालकः ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥'

एवं भावादिष्वप्यूह्यम् ।

'भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः ॥'

तत्र सदागमशब्दः संनिहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय सतः पुरुषस्यागम इति वस्तु व्यनक्ति । ननु सदागमः सदागम इवेति न कथमुपमाध्वनिः । सदागमशब्दयोरुपमानोपमेयभावाविवक्षणात् । रहस्यस्य संगोपनार्थमेव हि अर्थपदप्रतिपादनं प्रकरणादपर्यालोचनेन च सच्छास्त्राभिधानस्यासंबन्धत्वात् ।

अनन्यसाधारणधीर्धृताखिलवसुन्धरः ।
राजते कोऽपि जगति स राजा पुरुषोत्तमः ॥'

अत्र पुरुषोत्तमः पुरुषोत्तम इवेत्युपमाध्वनिः । अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ ।

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम् ।
देव त्रिपथगात्मानं गोपयत्युग्रमूर्धनि ॥'

इदं मम । अत्र पश्यन्तीति कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालंकारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालंकारोऽसंख्यपदद्योत्यः । एवमन्येष्वप्यर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्यम् ।

तदेवं ध्वनेः पूर्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यंग्यो वाक्यमात्रे भवन्नेकः । अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः ।

प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः ॥१०॥

प्रबंधे महावाक्ये । अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः । यथा महाभारते गृध्रगोमायुसंवादे—

'अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले ।
कङ्कालबहले घोरे सर्वप्राणिभयंकरे ॥
न चेह जीवितः कश्चित्कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥'

इति दिवा प्रभवतो गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां तं परित्यज्य गमनमिष्टम् ।

'आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत सांप्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात्कथं मूढास्त्यजध्वमविशंकिताः ॥'

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते, अत्र स्वतःसंभवी व्यञ्जकः । एवमन्येष्वेकादशभेदेषूदाहार्यम् एवं वाच्यार्थव्यञ्जकत्वे उदाहृतम् ।

पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः ।

असंलक्ष्यक्रमव्यंग्यो ध्वनिस्तत्र पदांशप्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः ।

'न्यक्कारो ह्ययमेव मे यदरयः—' इत्यादौ 'अरयः' इति बहुवचनस्य, 'तापसः' इत्येकवचनस्य, 'अत्रैव' इति सर्वनाम्नः, 'निहन्ति' इति 'जीवति' इति च तिङः, 'अहो' इत्यव्ययस्य, 'ग्रामटिका' इति कारूपतद्धितस्य, 'विलुण्ठन' इति व्युपसर्गस्य, 'भुजैः' इति बहुवचनस्य व्यञ्जकत्वम् ।

वर्णरचनयोरुदाहरिष्यते । प्रबन्धे यथा -महाभारते शान्तः रामायणे करुणः । मालतीमाधवरत्नावल्यादौ शृङ्गारः । एवमन्यत्र ।

तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः ॥ ११ ॥
संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया ।
वेदखाग्निशराः (५३०४) शुद्धैरिषुबाणाग्निसायकाः
(५३५५) ॥ १२ ॥

शुद्धैः शुद्धभेदैरेकपञ्चाशता योजनेत्यर्थः ।

अपरं तु गुणीभूतव्यंग्यं वाच्यादनुत्तमे व्यंग्ये ।

अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च संभवति ।

तत्र स्यादितरांगं काक्वाक्षिप्तं च वाच्यसिद्ध्यंगम् ॥१३॥
संदिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् ।
व्यंग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ॥ १४ ॥

इतरस्य रसादेरंगं रसादिव्यंग्यम् ।

इतरांगं यथा—

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणाम्मदः स गतः क्वापि तवेक्षणे क्षणात् ॥

अत्र रतिभावस्य भावप्रशमोऽङ्गम् ।

यथा वा—

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया ।
वचो वैदेहीति प्रतिपदमुदश्रु प्ररुदितम् ॥
कृतालंकाभर्तुर्वदनपरिपाटीषु घटना ।
मयाप्तं रामत्वं, कुशलवसुतानस्त्वधिगता ॥

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यांगतांनीतः ।

काक्वाक्षिप्तं यथा—

मथ्नामि कौरवशतं समरे न कोपा-
द्दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
संचूर्णयामि गदया न सुयोधनोरू
संधिं करोतु भवतां नृपतिः पणेन ॥

वाच्यसिद्ध्यङ्गं यथा—

दीपयन्रोदसीरन्ध्रमेष ज्वलति सर्वतः
प्रतापस्तव राजेन्द्र वैरिवंशदवानलः ॥

अत्रान्वयस्य वेणुत्वारोपणरूपो व्यंग्यः, प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम् ।

संदिग्धप्राधान्यं यथा—

राजानमपि सेवन्ते विषमप्युपभुञ्जते
रमन्ते च सह स्त्रीभिः कुशलाः खलु मानवाः ।

तुल्यप्राधान्यं यथा—

ब्राह्मणातिक्रमत्यागो भवतामेव शान्तये ।
जामदग्न्यस्तथा मित्रं अन्यथा दुर्मनायते ॥

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणां रक्षसामिव क्षणात्क्षयं करिष्यतीति व्यंग्यस्य वाच्यस्य च समप्राधान्यम् ।

अस्फुटं यथा—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥

अत्र व्यंग्यं क्लिष्टम् ।

बृहन्नलारूपस्यार्जुनस्य द्रौपदीं प्रत्युक्तिरियम्—

यस्याः सुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ ॥

काञ्चीगुणग्रथनभाजनमेष सोऽस्मि।
जीवन्नसम्प्रति भवामि किमावहामि ॥

जीवन्न भवामि-अश्लाघ्यजीवनोऽस्मीति अस्फुटम् ।

असुन्दरं यथा-

आपतन्तममुं दूराद्‌दूरीकृतपराक्रमः
बलोऽवलोकयामास मातङ्गमिव केशरी ॥

अत्र वाच्यापेक्षया व्यङ्ग्यमसुन्दरम्

अत्र केचित्

'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।'

इति । तन्न । यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत्, किं नामेषद्व्यङ्ग्यत्वम् । आस्वाद्यव्यङ्ग्यत्वम्, अनास्वाद्यव्यङ्ग्यत्वं वा । आद्ये प्राचीनभेदयोरेवान्तःपातः । द्वितीये त्वकाव्यत्वम् । यदि चानास्वाद्यत्वं तदा क्षुद्रत्वमेव । क्षुद्रतायामनास्वाद्यत्वात् ।

तदुक्तं ध्वनिकृता—

'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयते ॥' इति ।

इति साहित्यदर्पणे ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदनिरूपणो नाम
चतुर्थः परिच्छेदः ॥

पञ्चमः परिच्छेदः

अथ केयमभिनवा व्यञ्जना नाम वृत्तिरित्युच्यते—

वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम् ।

अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ॥ १ ॥

अभिधायाः संकेतितार्थमात्रबोधनविरतायाः न वस्त्वलंकार-रसादिव्यङ्ग्यबोधने क्षमत्वम् । न च संकेतितो रसादिः । नहि विभावाद्यभिधानमेव तदभिधानम्, तस्य तदेकरूप्यानङ्गीकारात् । यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः । क्व-चिच्च 'शृङ्गाररसोऽयम्' इत्यादौ स्वशब्देनाभिधानेऽपि न तत्प्रतीतिः तस्य स्वप्रकाशानन्दरूपत्वात् ।

अभिहितान्वयवादिभिरङ्गीकृता तात्पर्याख्या वृत्तिरपि संसर्गमात्रे परिक्षीणा न व्यङ्ग्यबोधिनी ।

यच्च केचिदाहुः—सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधा-व्यापारः, इति, यच्च धनिकेनोक्तं—

'तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।

यावत्कार्यप्रसारित्वात्तात्पर्यं न तुलाधृतम् ॥' इति,

तयोरुपरि, 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव पातनीयो दण्डः । एवं किमिति लक्षणाप्युपास्या । दीर्घदीर्घतराभिधाव्यापारेणैव तदर्थबोधसिद्धेः । किमिति च 'ब्राह्मण ! पुत्रस्ते जातः । कन्या ते गर्भिणी' इत्यादावपि हर्षशोकादीनामपि न वाच्यत्वम् ।

यत्पुनरुक्तं "पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत्, ततश्च काव्यश-

ब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिकप्रयोजनानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते । 'यत्परः शब्दः स शब्दार्थ', इति न्यायात्" इति ।

तत्र प्रष्टव्यम्—किमिदं तत्परत्वं नाम, तदर्थत्वं वा, तात्पर्यवृत्त्या तद्बोधकत्वं वा । आद्ये न विवादः । व्यङ्ग्यत्वेऽपि तदर्थतानपायात् । द्वितीये तु—केयं तात्पर्याख्या वृत्तिः । अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा, आद्ये दत्तमेवोत्तरम् । द्वितीये तु—नाममात्रे विवादः । तन्मतेऽपि तुरीयवृत्तिसिद्धेः ।

नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनम्—इति चेत्, न । तयोर्हेतुफलभावाङ्गीकारात् । यदाह मुनिः—"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति । सहभावे च कुतः सव्येतरविषाणयोरिव कार्यकारणभावः पौर्वापर्यविपर्ययात् ।

'गंगायां घोषः' इत्यादौ तटाद्यर्थमात्रबोधविरतायां लक्षणायाश्च कुतः शीतत्वपावनत्वादिव्यङ्ग्यबोधकता । तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत् ।

किंच—

बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यंग्यः ॥२॥

वाच्यार्थव्यंग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैर्वैयाकरणैरपि सहृदयैरेव च संवेद्यतया बोद्धृभेदः । उपकृतं—इत्यादौ क्वचिद्वाच्ये विधिरूपे निषेधरूपतया, च स्वरूपभेदः 'गतोऽस्तमर्कः'

इत्यादौ च वाच्योऽर्थ एक एव प्रतीयते। व्यंग्यस्तु तद्बोद्धादिभेदात् अनेक इति संख्याभेदः। वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः। एष तु यथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः। केवलरूपतया चमत्कारितया च प्रतीतिभेदः। पूर्वपश्चाद्भावेन च कालभेदः। शब्दतदेकदेशतदर्थवर्णसंघटनाश्रयत्वेन चाश्रयभेदः।

किंच।

प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।

किं च मुख्यार्थबाधस्य विरहादपि लक्षणा ॥३॥

'न बोधिका' इति शेषः। नहि कोऽपि रसनात्मकव्यापाराद्भिन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति। यमिमे लक्षणाभिधे बोधयेताम्।

किंच यत्र 'गङ्गायां घोषः' इत्यादावुपात्तशब्दार्थानां बुभूषन्नेवान्वयोऽनुपपत्त्या बाध्यते तत्रैव हि लक्षणायाः प्रवेशः।

यदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्यैः—

'श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन संगतिः ॥'

न पुनः व्यंग्ये सर्वत्र मुख्यार्थबाधः। यदि च 'गङ्गायां घोषः' इत्यादौ प्रयोजनं लक्ष्यं स्यात्, तीरस्य मुख्यार्थत्वं बाधितत्वं च स्यात्, तस्यापि च लक्ष्यतया प्रयोजनान्तरमित्यनवस्थापातः।

न चापि प्रयोजनविशिष्ट एव तीरे लक्षणा। विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्युपगमात्। नीलादिसंवेदनानन्तरमेव हि ज्ञाततया अनुव्यवसायस्य वा संभवः।

नानुमानं रसादीनां व्यंग्यानां बोधनक्षमम् ।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः ॥ ४ ॥

व्यक्तिविवेककारेण हि—"यापि विभावादिभ्यो रसादीनां प्रतीतिः सानुमान एवान्तर्भवितुमर्हति । विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते, ते हि रत्यादीनां भावानां कारणकार्यसहकारिभूतास्ताननुमापयन्त एव रसादीन्निष्पादयन्ति, त एव प्रतीयमाना आस्वादपदवीं गताः सन्तो रसा उच्यन्त इति, अवश्यभावी तत्प्रतीतिक्रमः केवलमाशुभावितया न लक्ष्यते, यतोऽयमत्राप्यभिव्यक्तिक्रमः" इति यदुक्तम्, तत्र प्रष्टव्यम्—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः, तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा । आद्ये न विवादः । किंतु 'रामादिगतरागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः' इत्येव विशेषः । द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतयासिद्ध एव । यच्चोक्तं तेनैव—'यत्र यत्रैवंविधानां विभावानुभावसात्त्विकसंचारिणामभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भावः, इति सुग्रहैव व्याप्तिः पक्षधर्मता च ।

तथा—

'अर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम् ।
सैवानुमितपक्षे नो गमकत्वेन संमता ॥' इति ।

इदमपि नो न विरुद्धम् । नह्येवंविधा प्रतीतिरास्वाद्यत्वेनास्माकमभिमता । किं तु—स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः । तेनात्र सिषाधयिषितादर्थादर्थान्तरस्य साधनाद्धेतोरा

भासता ।

एतेनार्थापत्तिवेद्यत्वमपि व्यङ्ग्यानामपास्तम्। अर्थापत्तेरपि पूर्वसिद्धव्याप्तीच्छामुपजीव्यैव प्रवृत्तेः। यथा—'यो जीवति स कुत्राप्यवतिष्ठते, जीवति चात्र गोष्ठायामविद्यमानश्चैत्रः, इत्यादि।

किंच वस्त्रविक्रयादौ तर्जनीतोलनेन दशसंख्यादिवत्सूचनबुद्धिवेद्योऽप्ययं न भवति। सूचनबुद्धेरपि संकेतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारतांगीकारात्।

यच्च, संस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिः इति केचित् तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता।

'दुर्गालङ्घित' इत्यादौ च द्वितीयार्थो नास्त्येव—इति यदुक्तं महिमभट्टेन, तदनुभवसिद्धिमपलपतो गजनिमीलिकैव।

तदेवमनुभवसिद्धस्य तत्तद्रसादिलक्षणाथस्याशक्यापलापतया तत्तच्छब्दाद्यन्वयव्यतिरेकानुविधायितया चानुमानादिप्रमाणावेद्यतया चाभिधादिवृत्तित्रयाबोध्यतया च तुरीया वृत्तिरुपास्यैवेति सिद्धम्। इयं च व्याप्त्याद्यनुसंधानं विनापि भवतीत्यखिलं निर्मलम्।

तत्किंनामिकेयं वृत्तिरित्युच्यते—

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः॥ ५॥

एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्वमवदातम्॥

॥ इति साहित्यदर्पणे व्यञ्जनाव्यापारनिरूपणो नाम पंचमः परिच्छेदः॥

षष्ठः परिच्छेदः ।

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह—

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयं

तस्य रूपकसंज्ञाहेतुमाह—

तद्रूपारोपात्तु रूपकम् ॥ १ ॥

तद्दृश्यं काव्यं नटे रामादिस्वरूपारोपाद्रूपकमित्युच्यते ।

कोऽसावभिनय इत्याह—

भवेदभिनयोऽवस्थानुकारः स चतुर्विधः ।

आंगिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥ २ ॥

नटै रङ्गादिभी रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः ।

रूपकस्य भेदानाह—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥ ३ ॥

किंच ।

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।

प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ ४ ॥

संलापकं श्रीगदितं शिल्पकं च विलासिका ।

दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ ५ ॥

अष्टादश प्राहुरुपरूपकाणि मनीषिणः ।

विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ ६ ॥

सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च ।

तत्र

नाटकं ख्यातवृत्तं स्यात्पञ्चसंधिसमन्वितम् ।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥ ७ ॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ॥ ८ ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥९॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ॥ १० ॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ॥ ११ ॥

ख्यातं रामायणादिप्रसिद्धं वृत्तम् । यथा—रामचरितादि । संधयो वक्ष्यन्ते । नानाविभूतिभियुक्तमिति महासहायम् । सुखदुःखसमुद्भूतित्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम् । राजर्षयो दुष्यन्तादयः । दिव्याः श्रीकृष्णादयः । दिव्यादिव्यः, ये दिव्योऽप्यात्मनि नराभिमानी यथा—श्रीरामचन्द्रः । 'गोपुच्छाग्रसमाग्रमिति क्रमेणाङ्काः सूक्ष्माः कर्तव्याः' इति केचित् । अन्ये त्वाहुः—'यथा गोपुच्छे केचिद्वाला ह्रस्वाः केचिद्दीर्घास्तथेह कानिचित्कार्याणि मुखसंधौ समाप्तानि, कानिचित्प्रतिमुखे । एवमन्येष्वपि कानिचित्कानिचित्" इति

प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः ।
भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ १२ ॥
विच्छिन्नावान्तरैकार्थः किंचित्संलग्नबिन्दुकः ।
युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥१३॥
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मितः ।१४॥
नानेकदिननिर्वर्त्यकथया संप्रयोजितः ।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा ॥१५॥
दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥१६॥
दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरं च यत् ।
शयनाधरपानादि नगराद्यवरोधनम् ॥ १७ ॥
स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः ।
देवीपरिजनादीनाममात्यवणिजामपि ॥ १८ ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति
कीर्तितः ॥ १९ ॥

बिन्द्वादयो वक्ष्यन्ते । आवश्यकं संध्यावन्दनादि ।
अङ्कप्रस्तावाद्गर्भाङ्कमाह—

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥२०॥

यथा बालरामायणे --रावणं प्रति कञ्चुकी

श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम् ॥

इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः ।

तत्र पूर्वं पूर्वरङ्गं सभापूजा ततः परम् ।
कथनं कविसंज्ञादेर्नाटकस्याप्यथामुखम् ॥२१॥

तत्रेति नाटके ।

यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ २२ ॥
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि ।
तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये॥२३॥

तस्याः स्वरूपमाह—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥२४॥
माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥ २५ ॥

एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम् । वस्तुतस्तु 'पूर्वरङ्गस्य रंगद्वाराभिधानमङ्गम्' इत्यन्ये ।

यदुक्तम्—

'यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते ।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम् ॥' इति ।

उक्तप्रकारायाश्च नान्द्या रंगद्वारात्प्रथमं नटैरेव कर्तव्यतया न महर्षिणा निर्देशः कृतः।

कालिदासादिमहाकविप्रबंधेषु च—

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥,

एवमादिषु नान्दीलक्षणायोगात्। उक्तं च—'रंगद्वारमारभ्य कविः कुर्यात्—, इत्यादि। अतएव प्राक्तनपुस्तकेषु, नान्द्यन्ते सूत्रधारः' इत्यनन्तरमेव 'वेदान्तेषु—, इत्यादिश्लोकलिखनं दृश्यते। यच्च पश्चात्—
'नान्द्यन्ते सूत्रधारः' इति लिखनं तस्यायमभिप्रायः—नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्, इतःप्रभृति मया नाटकमुपादीयत इति कवेरभिप्रायः सूचित इति।

पूर्वरंगं विधायैव सूत्रधारो निवर्तते।
प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः॥ २६ ॥
दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः।
सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥ २७ ॥

काव्यार्थस्य स्थापनात्स्थापकः। तद्वदिति। सूत्रधारसदृशगुणाकारः। इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः। स स्थापको दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रं च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत्। वस्तु इतिवृत्तं यथोदात्तराघवे—

'रामो मूर्ध्नि निधाय काननमगान्मालामिवाज्ञां गुरोस्त-
द्भक्त्या भरतेन राज्यमखिलं मात्रा सहैवोज्झितम्।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परामुन्नतिं
प्रोत्सिक्ता दशकंधरप्रभृतयो ध्वस्ताः समस्ताः द्विषः ॥'

बीजं यथा रत्नावल्याम्—

'द्वीपादन्यस्मादपि मध्यादपि जलधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥'

अत्र हि समुद्रे प्रवहणभङ्गमग्नोत्थिताया रत्नावल्या अनुकूलदैवलालितो वत्सराजगृहप्रवेशो यौगंधरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम्।

मुखं श्लेषादिना प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः। यथा—

'आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तिः।
उत्खाय गाढतमसं घनकालमुग्रं
रामो दशास्यमिव संभृतबन्धुजीवः ॥'

पात्रं यथा शाकुन्तले—

'तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारंगेणातिरंहसा ॥'

रंगं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्तयेत् ॥ २८ ॥
ऋतुं च कंचित्प्रायेण भारतीं वृत्तिमाश्रितः।

स स्थापकः। प्रायेणेति क्वचिदृतोरकीर्तनमपि। यथा—रत्नावल्याम्।

भारतीवृत्तिस्तु—

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ॥ २९ ॥

संस्कृतबहुलो वाक्प्रधानो व्यापारो भारती ।

तस्याः प्ररोचना वीथी तथा प्रहसनामुखे ।

अंगान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना ॥ ३० ॥

प्रस्तुताभिनयेषु प्रशंसातः श्रोतृणां प्रवृत्युन्मुखीकरणं प्ररोचना । यथा रत्नावल्याम्—

'श्रीहर्षो निपुणः कविः, परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं, नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं, किं पुन—
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥',

वीथीप्रहसने वक्ष्येते ।

नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ ३१ ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥ ३२॥

सूत्रधारसदृशत्वात्स्थापकोऽपि सूत्रधार उच्यते । तस्यानुचरः पारिपार्श्वकः । तस्मात्किंचिदूनो नटः ।

उद्धात्य (त) कः कथोद्धातः प्रयोगातिशयस्तथा ।
प्रवर्तकावलगिते पञ्च प्रस्तावनाभिदाः ॥ ३३ ॥

तत्र

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स उद्धात्य (त)क उच्यते ॥३४॥

यथा मुद्राराक्षसे सूत्रधारः—

क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम् ।

अभिभवितुमिच्छति बलात्—,

इत्यनन्तरम्—, (नेपथ्ये ।) आः, क एष मयि जीवति चन्द्रगुप्त-मभिभवितुमिच्छति ।, इति ।

अत्रान्यार्थवन्त्यपि पदानि हृदयस्थार्थगत्या अर्थान्तरे संक्रमय्य पात्रप्रवेशः ।

सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा ।

भवेत्पात्रप्रवेशश्चेत्कथोद्घातः स उच्यते ॥३५॥

वाक्यं यथा रत्नावल्याम्—'द्वीपादन्यस्मादपि , इत्यादौ सूत्रधारेणपठिते—(नेपथ्ये ।) एवमेतत् । कः संदेहः । द्वीपा-दन्यस्मादपि—, इत्यादि पठित्वा यौगंधरायणस्य प्रवेशः ।

वाक्यार्थो यथा वेण्याम्—

'निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनताः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥'

इति सूत्रधारेण पठितस्य वाक्यस्यार्थं गृहीत्वा—'(नेपथ्ये) आः दुरात्मन्, वृथा मङ्गलपाठक ! कथं स्वस्था भवन्तु मयि जी-वति धार्तराष्ट्राः ।' ततः सूत्रधारनिष्क्रान्तौ भीमसेनस्य प्रवेशः ।

यदि प्रयोग एकस्मिन्प्रयोगोऽन्यो प्रयुज्यते ।

तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा ॥३६॥

यथा कुन्दमालायाम्—'[नेपथ्ये] इत इतोऽवतरत्वार्या। सूत्रधारः—कोऽयं खल्वार्याह्वानेन साहायकमपि मे संपादयति [विलोक्य।] कष्टमतिकरुणं वर्तते।

लंकेश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां जनपदादपि गर्भगुर्वी
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्॥,

अत्र नृत्यप्रयोगार्थं स्वभार्याह्वानमिच्छता सूत्रधारेण सीतां वनाय परिकर्षति लक्ष्मणोऽयम्' इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः।

कालं प्रवृत्तमाश्रित्य सूत्रधृग्यत्र वर्णयेत्।
तदाश्रयश्च पात्रस्य प्रवेशस्तत्प्रवर्तकम्॥३७॥

यथा—'आसादितप्रकट—इत्यादि। [ततः प्रविशति यथानिर्दिष्टो रामः।]

यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते।
प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः॥३८॥

यथा शाकुन्तले—सूत्रधारो नटीं प्रति। 'तवास्मि गीतरागेण—' इत्यादि। ततो राज्ञः प्रवेशः।

योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि।

अत्र आमुखे। उद्घात्य [त]कावलगितयोरितराणि वीथ्यंगानि वक्ष्यमाणानि।

नखकुट्टस्तु—

नेपथ्योक्तं श्रुतं यत्र त्वाकाशवचनं तथा॥३९॥
समाश्रित्यापि कर्तव्यमामुखं नाटकादिषु ।
एषामामुखभेदानामेकं कंचित्प्रयोजयेत् ॥ ४० ॥
तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक् ।
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रयोजयेत् ।४१।

वस्तित्वतिवृत्तम् ।

इदं पुनर्वस्तु बुधैर्द्विविधं परिकल्प्यते ।
आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम् ॥ ४२ ॥
अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः ।
तस्येतिवृत्तं कविभिराधिकारिकमुच्यते ॥ ४३ ॥

फले प्रधानफले । यथा बालरामायणे रामचरितम् ।

अस्योपकरणार्थं तु प्रासंगिकमितीष्यते ।

अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत्प्रासंगिकम् । यथा सुग्रीवादिचरितम् ।

पताकास्थानकं योज्यं सुविचार्येह वस्तुनि ॥ ४४ ॥

इह नाट्ये ।

यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिंगोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकं तु तत् ॥ ४५ ॥

तद्भेदानाह —

सहसैवार्थसंपत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्तितम् ॥४६॥

यथा वेणीसंहारे युधिष्ठिरेण भीमप्रत्यभिज्ञानम् ।

वचः सातिशयक्लिष्टं नानाबंधसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्तितम् ॥ ४७ ॥

यथा वेण्याम्—

'रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ॥'

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनान्नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम् ।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥ ४८ ॥

लीनमव्यक्तार्थम्, श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतम्, सविनयं विशेषनिश्चयप्राप्त्या सहितं संपाद्यते यत्तत्तृतीयं पताकास्थानम् ।

यथा वेण्यां द्वितीयेऽङ्के—'कञ्चुकी—देव, भग्नम् । राजा—केन । कञ्चुकी—भीमेन । राजा—कस्य । कञ्चुकी—भवतः । राजा—आः, किं प्रलपसि । कञ्चुकी—(सभयम् ।) देव ननु ब्रवीमि । भग्नं भीमेन भवतः । राजा—धिग् वृद्धापसद, कोऽयमद्य ते व्यामोहः । कञ्चुकी—देव, न व्यामोहः । सत्यमेव ।

भग्नं भीमेन भवतो मरुता रथकेतनम् ।
पतितं किंकिणीक्वाणबद्धाक्रन्दमिव क्षितौ ॥'

अत्र दुर्योधनोरुभङ्गरूपप्रस्तुतसंक्रान्तमर्थोपक्षेपणम् ।

द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ॥४९॥

एतानि चत्वारि पताकास्थानानि क्वचिन्मङ्गलार्थं क्वचिदमङ्गलार्थं सर्वसंधिषु भवन्ति। काव्यकर्तुरिच्छावशाद्भूयो भूयोऽपि भवंति। यत्पुनः केनचिदुक्तम्—'मुखसंधिमारभ्य संधिचतुष्टये क्रमेण भवंति' इति, तदन्ये न मन्यन्ते। एषामत्यन्तमुपादेयानामनियमेन सर्वत्रापि सर्वेषामपि भवितुं युक्तत्वात्।

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥५०॥

अनुचितमितिवृत्तं यथा—रामस्य छद्मना वालिवधः। सचोदात्तराघवे नोक्त एव। वीरचरिते तु वाली रामवधार्थमागतो रामेण हत इत्यन्यथाकृतः।

अङ्केष्वदर्शनीया या वक्तव्यैव च संमता ।
या च स्याद्वर्षपर्यन्तं कथा दिनद्वयादिजा ॥५१॥
अन्या च विस्तरात्सूच्या सार्थोपक्षेपकैर्बुधैः ।

अंकेषु अदर्शनीया कथा युद्धादिकथा।

वर्षादूर्ध्वं तु यद्वस्तु तत्स्याद्वर्षादधोभवम् ॥५२॥

उक्तं हि मुनिना—

अंकच्छेदे कार्यं मासकृतं वर्षसंचितं वापि।
तत्सर्वं कर्तव्यं वर्षादूर्ध्वं न तु कदाचित् ॥,

एवं च चतुर्दशवर्षव्यापिन्यपि रामवनवासे ये ये विराध-

वधादयः कथांशास्ते ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः।

दिनावसाने कार्यं यद्दिनेनैवोपपद्यते।
अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत् ॥ ५३ ॥

के तेऽर्थोपक्षेपका इत्याह—

अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ।
चूलिकांकावतारोऽथ स्यादङ्कमुखमित्यपि ॥ ५४ ॥
वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥५५॥
मध्येन मध्यमाभ्यां वा पात्राभ्यांसंप्रयोजितः।
शुद्धः स्यात्सतु संकीर्णो नीचमध्यमकल्पितः॥५६॥

तत्र शुद्धो यथा—मालतीमाधवे श्मशाने कपालकुण्डला।
संकीर्णो यथा—रामाभिनन्दे क्षपणककापालिकौ।

अथ प्रवेशकः—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥५७॥

अंकद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः। यथा—वेण्यामश्वत्थामाङ्के राक्षसमिथुनम्।

अथ चूलिका—

अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका।

यथा वीरचरिते चतुर्थाङ्कस्यादौ—(नेपथ्ये।) भो भो वैमानिकाः, प्रवर्तन्तां रङ्गमङ्गलानि।, इत्यादि। 'रामेण पर-

शुरामो जितः ।, इति नेपथ्ये पात्रैः सूचितम् ।

अथांकावतारः—

अङ्कांते सूचितः पात्रैस्तदङ्कस्याविभागतः ५८

यत्राङ्कोऽवतरत्येषो ऽङ्कावतार इति स्मृतः

यथा—अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठांकस्तदंकस्याङ्गविशेष इवावतीर्णः ।

अथाङ्कमुखम्—

यत्र स्यादंक एकस्मिन्नंकानां सूचनाखिला ॥ ५९ ॥

तदंकमुखमित्याहुर्बीजार्थख्यापकं च तत् ।

यथा—मालतीमाधवे प्रथमांकादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमिकानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात्संनिवेशं सूचितवत्यौ ।

अंकान्तपात्रैर्वांकास्यं छिन्नांकस्यार्थसूचनात् ॥ ६० ॥

अंकान्तपात्रैरंकान्ते प्रविष्टैः पात्रैः । यथा वीरचरिते द्वितीयांकांते—'[प्रविश्य ।] सुमंत्रः—भगवन्तौ वसिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः । इतरे—क भगवन्तौ । सुमंत्रः—महाराजदशरथस्यान्तिके । इतरे—तत्तत्रैव गच्छावः ।, इत्यंकपरिसमाप्तौ । [ततः प्रविशन्त्युपविष्टा वसिष्ठविश्वामित्रपरशुरामाः ।], इत्यत्र पूर्वांकांत एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तरांकमुखसूचनादंकास्यम् , इति । एतच्च धनिकमतानुसारेणोक्तम् । अन्ये तु-'अंकावतरणेनैवेदं गतार्थम्' इत्याहुः ।

अपेक्षितं परित्यज्य नीरसं वस्तु विस्तरम् ।
यदा संदर्शयेच्छेषमामुखानन्त तदारं ॥ ६१ ॥
कार्यो विष्कम्भको नाट्य आमुखाक्षिप्तपात्रकः॥

यथा—रत्नावल्यां यौगंधरायणप्रयोजितः ।

यदा तु सरसं वस्तु मूलादेव प्रवर्तते ॥ ६२ ॥
आदावेव तदाङ्के स्यादामुखाक्षेपसंश्रयः ।

यथा—शाकुन्तले ।

विष्कंभकाद्यैरपि नो वधो वाच्योऽधिकारिणः॥६३
अन्योन्येन तिरोधानं न कुर्याद्रसवस्तुनोः ।

रसः शृङ्गारादिः । यदुक्तं धनिकेन—

'न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत् ।
रसं वा न तिरोदध्याद्वस्त्वलंकारलक्षणैः ॥' इति ।

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ॥६४॥
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि ।

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः ।

तत्र बीजम्—

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ॥६५॥
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ।

बीजं यथा सीताप्रवासनस्याग्रहेतुभूतं दुर्मुखोक्तवृत्त श्रवण मुत्तर चरिते ।

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥६६॥

यथा तमसामुरलयोः परस्परालापोत्तरं 'तमसा। तदियं गोदावरीह्रदान्निस्सृत्य—परिपाण्डु, इत्यादि। उत्तरे।

व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।

यथोत्तर चरिते शम्बूकस्य स्वर्गगमनम्।

यथा—रामचरिते सुग्रीवादेः, वेण्यां भीमादेः, शाकुन्तले विदूषकस्य चरितम्।

पताका नायकस्य स्यान्न स्वकीयफलान्तरम् ॥६७॥

गर्भे संधौ विमर्शे वा निर्वाहस्तस्य जायते।

यथा—सुग्रीवादे राज्यप्राप्त्यादि। यत्तु मुनिनोक्तम्—

'आ गर्भाद्वाविमर्शाद्वा पताका विनिवर्तते।', इति,

तत्र पताकेति। पताका नायकफलं निर्वहणपर्यन्तमपि पताकायाः प्रवृत्तिदर्शनात्' इत व्याख्यातमभिनवगुप्तपादैः।

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता॥ ६८॥

यथा—कुलपत्यङ्के रावणजटायुसंवादः।

प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम्।

अपेक्षितं तु यत्साध्यमारम्भो यन्निबंधनः॥६९॥

समापनं तु यत्सिद्ध्यै तत्कार्यमिति संमतम्।

यथा—रामचरिते रावणवधः।

अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः॥७०॥

आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ॥७१॥

यथा वीरचरिते सीताप्राप्तीच्छा—

प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।

यथा रामचरिते समुद्र बन्धनादि—

उपायापायशंकाभ्यां प्राप्त्याशा प्राप्तिसंभवः ॥७२॥

यथा तृतीयांके स्पर्शेन रामस्य सीताप्राप्त्यशा उत्तर राम चरिते।

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।

यथा रावणवधे सीताप्राप्तिर्निश्चिता—

सावस्था फलयोगः स्याद्यः समग्रफलोदयः ॥७३॥

यथा सीताप्राप्तिः—

यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः :

पञ्चधैवेतिवृत्तस्य भागाः स्युः, पञ्च सन्धयः ॥ ७४ ॥

तल्लक्षणमाह —

अन्तरैकार्थसंबन्धः संधिरेकान्वये सति।

एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसंबन्धः संधिः।

तद्भेदानाह—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।

इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ॥७५॥

यथोद्देशं लक्षणमाह—

यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा ॥ ७६ ॥

प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्।

फलप्रधानोपायस्य मुखसंधिनिवेशिनः ॥ ७७ ॥

लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्।

फलप्रधानोपायस्य प्रागुद्भिन्नस्य किंचन ॥ ७८ ॥

गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः।

अथः विमर्शः—

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः ॥७९॥
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः।

सन्देहाद्यैः सान्तरायः।

अथ निर्वहणम्—

अन्ते—

बीजवन्तो मुखाद्यर्थां विप्रकीर्णा यथायथम् ॥८०॥
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्।

ताः पञ्चापि सन्धयो मुद्राराक्षसे साङ्गस्येन वर्तन्ते।

यथा – शाकुन्तले सप्तमांके शकुन्तलाभिज्ञानादुत्तरोऽर्थराशिः।

अथ वृत्तयः—

शृंगारे कैशिकी, वीरे सात्वत्यारभटी पुनः।
रसे रौद्रे च बीभत्से, वृत्तिः सर्वत्र भारती ॥१२२॥

चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः।
स्युर्नायकादिव्यापारविशेषा नाटकादिषु ॥ १२३ ॥

तत्र कैशिकी—

या श्लक्ष्णनेपथ्यविशेष चित्रा स्त्रीसंकुला पुष्कला नृत्यगीत-
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता ॥ १२४ ॥

सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः ।१२८॥

सहर्षा क्षुद्रशृंगारा विशोका साद्भुता तथा ।
उत्थापकोऽथ सांघात्यः संलापः परिवर्तकः ।१२९।
विशेषा इति चत्वारः सात्त्वत्याः परिकीर्तिताः ।
उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते ॥ १३० ॥

यथा महावीरचरिते—

'आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा
वैतृष्ण्यं तु कुतोऽद्य संप्रति मम त्वद्दर्शने चक्षुषः ।
यन्माङ्गल्यसुखस्य नास्मि विषयः किं वा बहुव्याहृतै-
रस्मिन्विस्मृतजामदग्न्यविजये बाहौ धनुर्जृम्भताम् ॥',

मंत्रार्थदैवशक्त्यादेः सांघात्यः संघभेदनम् ।

मन्त्रशक्त्या यथा मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्ध्या भेदनम् । अर्थशक्त्यापि तत्रैव । दैवशक्त्या यथा रामायणे रावणाद्विभीषणस्य भेदः ।

संलापः स्याद्गभीरोक्तिर्नानाभावसमाश्रया ॥१३१॥

यथा वीरचरिते—'रामः—अयं स यः किल सपरिवारकार्तिकेयविजयावर्जितेन भगवता नीललोहितेन परिवत्सरसहस्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः । परशुरामः—राम ! दाशरथे ! स एवायमाचार्यपादानां प्रियः परशुः ।' इत्यादि ।

प्रारब्धादन्यकार्याणां करणं परिवर्तकः ।

यथा वेण्याम्—'भीमः—सहदेव, गच्छ त्वं गुरुमनुवर्तस्व । अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामीति यावत् । अथवा आमन्त्रयितव्यैव मया पाञ्चाली ।' इति ।

अथारभटी—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः॥१३२॥

संयुक्ता वधबंधाद्यैरुद्धतारभटी मता।

वस्तूत्थापनसंफेटौ संक्षिप्तिरवपातनम् ॥ १३३ ॥

इति भेदास्तु चत्वार आरभट्याः प्रकीर्तिताः।

मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते ॥१३४॥

यथोदात्तराघवे—

'जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-

र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी।

एते चोग्रकबंधकण्ठरुधिरैराध्मायमानोदरा

मुञ्चन्त्याननकंदरानलमुचस्तीव्रान्रवान्फेरवाः॥' इत्यादि।

संफेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः।

यथा मालत्यां माधवाघोरघण्टयोः।

संक्षिप्ता वस्तुरचना शिल्पैरितरथापि वा ॥ १३५ ॥

संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः।

यथोदयनचरिते कलिङ्गहस्तिप्रयोगः। द्वितीयं यथा वालिनिवृत्त्या सुग्रीवः। यथा वा परशुरामस्यौद्धत्यनिवृत्त्या शान्तस्वापादानम्—'पुण्या ब्राह्मणजातिः— इति।

प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसंभवम् ॥ १३६ ॥

अवपातनमित्युक्तं

यथा कृत्यरावणे षष्ठेऽङ्के— प्रविश्य खड्गहस्तः पुरुषः इत्यतः प्रभृति निष्क्रमणपर्यन्तम्।

पूर्वमुक्तैव भारती।

(भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ।)

अथ नाट्योक्तयः—

अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ॥१३७॥

सर्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितम् ।

रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते ॥१३८॥

त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।

अन्योन्यामंत्रणं यत्स्यात्तज्जनान्ते जनान्तिकम् ॥१३९

किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।

श्रुत्वैवनुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥१४०॥

यः कश्चिदर्थो यस्माद्गोपनीयस्तस्यान्तरत ऊर्ध्वसर्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वान्येन सह यन्मन्त्र्यते तज्जनान्तिकम् । परावृत्यान्यस्य रहस्यकथनमपवारितम् । शेषं स्पष्टम् ।

दत्तां सिद्धां च सेनां च वेश्यानां नाम दर्शयेत् ।

दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ॥१४१॥

वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत् ।

वेश्या यथा वसन्तसेनादिः । वणिग्विष्णुदत्तादिः । चेटः कलहंसादिः । चेटी मन्दारिकादिः ।

नाम कार्यं नाटकस्य गर्भितार्थप्रकाशम् ॥ १४२ ॥

यथा रामाभ्युदयादिः ।

नायिकानायकाख्यानात्संज्ञा प्रकरणादिषु ।

यथा मालतीमाधवादिः ।

नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ॥ १४३ ॥

यथा रत्नवली-कर्पूरमञ्जर्यादिः ।

प्रायेण ण्यन्तकः साधिगमेः स्थाने प्रयुज्यते ।

यथा शाकुन्तले-ऋषी 'गच्छावः, इत्यर्थे 'साधयावस्तावत्' ।

राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ॥१४४॥
राजर्षिभिर्वयस्येति तथा विदूषकेण च ।
राजन्नित्यृषिभिर्वाच्यः, सोऽपत्यप्रत्ययेन च ॥१४५॥
स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ॥१४६॥
वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम् ।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ॥१४७॥
सूत्रधारो मारिषेति, हंडे इत्यधमैः समाः ।
वयस्येत्युत्तमैर्हंहो मध्यैरार्येति चाग्रजः ॥१४८॥
भगवन्निति वक्तव्याः सर्वैर्देवर्षिलिङ्गिनः ।
वदेद्राज्ञीं च चेटीं च भवतीति विदूषकः ॥१४९॥
आयुष्मन्रथिनं सूतो, वृद्धं तातेति चेतरः ।
वत्स पुत्रकतातेति नाम्ना गोत्रेण वा सुतः ॥१५०॥
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्येति चाधमैः ।
विप्रैरयममात्येति सचिवेति च भण्यते ॥ १५१ ॥
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः ।
स्वगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ।१५२॥

उपाध्यायेति चाचार्यो महाराजेति भूपतिः ।
स्वामीति, युवराजस्तु कुमारो भर्तृदारकः ॥१५३॥
भद्रसौम्यमुखेत्येवमधमैस्तु कुमारकः ।
वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका ॥१५४॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ।
हलेति सदृशी, प्रेष्या हंजे, वेश्याज्जुका तथा ॥१५५॥
कुट्टिन्यम्बेत्यनुगतैः, पूज्या च जरती जनैः ।
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः ॥१५६॥
शकादयश्च संभाष्या भद्रदत्तादिनामभिः ।
यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा ॥१५७॥
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ।

अथ भाषाविभागः—

पुरुषाणामनीचानां संस्कृतं स्यात्कृतात्मनाम् ॥ १५८ ॥
सौरसेनी प्रयोक्तव्या तादृशीनां च योषिताम् ।
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ॥ १५९ ॥
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ।
चेटानां राजपुत्राणां श्रेष्ठानां चार्धमागधी ॥१६०॥
प्राच्या विदूषकादीनां, धूर्तानां स्यादवन्तिजा ।
योधनागरिकादीनां, दाक्षिणात्या हि दीव्यताम् ॥१६१
शबराणां शकादीनां शाबरीं संप्रयोजयेत् ।
वाल्हीकभाषोदीच्यानां द्राविडी द्राविडादिषु ॥ १६२ ॥

आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु ।
आभीरी शावरी चापि काष्ठपात्रोपजीविषु । ॥ १६३ ॥
तथैवांगारकारादौ पैशाची स्यात्पिशाचवाक् ।
चेटीनामप्यनीचानामपि स्यात्सौरसेनिका ॥ १६४ ॥
बालानां षण्डकानां च नीचग्रहविचारिणाम् ।
उन्मत्तानामातुराणां सैव स्यात्संस्कृतं क्वचित् ॥ १६५ ॥
ऐश्वर्येण प्रमत्तस्य दारिद्र्योपद्रुतस्य च ।
भिक्षुवल्कधरादीनां प्राकृतं संप्रयोजयेत् ॥१६६॥
संस्कृतं संप्रयोक्तव्यं लिंगिनीषूत्तमासु च ।
देवीमातृसुतावेश्यास्वपि कैश्चित्तथोदितम् ॥१६७॥
यद्देश्यं नीचपात्रं तु तद्देश्यं तस्य भाषितम् ।
कार्यतश्चोत्तमादीनां कार्यो भाषाविपर्ययः ॥ ६८॥
योषित्सखीबालवेश्याकितवाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ॥ ६९ ॥

एषामुदाहरणान्याकरेषु बोद्धव्यानि । भाषालक्षणानि मम तातपादानां भाषार्णवे ।

एतदेव यदा सर्वैः पताकास्थानकैर्युतम् ॥२२३॥
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे ।

एतदेव नाटकम् । यथा—बालरामायणम् ।

अथ प्रकरणम् —

भवेत्प्रकरणं वृत्तं लौकिकं कविकल्पितम् ॥ २२४ ॥
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥ २२४ ॥

विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।

नायिका कुलजा क्वापि वेश्या, क्वापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ॥ २२६ ॥
कितवद्यूतकारादिविटचेटकसंकुलः ।

कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गवृत्ते । द्वे अपि मृच्छकटिके । अस्य नाटकप्रकृतित्वाच्छेषं नाटकवत् ।

अथ भाणः —

भाणः स्याद्धूर्तचरितो नानावस्थान्तरात्मकः ॥२२७॥
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ।
रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा ॥ २२८ ॥
संबोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः ॥ २२९ ॥
तत्रेतिवृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ।
मुखनिर्वहणे संधी लास्याङ्गानि दशापि च ॥ २३० ॥

अत्राकाशभाषितरूपपरवचनमपि स्वयमेवानुवदन्नुत्तरप्रत्युत्तरे कुर्यात् । शृङ्गारवीररसौ च सौभाग्यशौर्यवर्णनया सूचयेत् । प्रायेण भारती क्वापि कैशिक्यपि वृत्तिर्भवति । लास्याङ्गानि गेयपदादीनि । उदाहरणं लीलामधुकरः ।

ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः ।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः ॥ २३१ ॥

एकांकश्च भवेदस्त्रीनिमित्तसमरोदयः ।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नायकः ॥ २३२ ॥
राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः ।
हास्यशृंगारशान्तेभ्य इतरेऽत्रांगिनो रसाः ॥ २३३ ॥

यथा सौगन्धिकाहरणम् ।

अथ समवकारः—

वृत्तं समवकारे तु ख्यातं देवासुराश्रयम् ।
संधयो निर्विमर्शास्तु त्रयोऽङ्कास्तत्र चादिमे ॥ २३४ ॥
संधी द्वावन्त्ययोस्तद्वदेक एको भवेत्पुनः ।
नायका द्वादशोदात्ताः प्रख्याता देवमानवाः ॥ २३५ ॥
फलं पृथक्पृथक्तेषां वीरमुख्योऽखिलो रसः ।
वृत्तयो मन्दकैशिक्यो नात्र विन्दुप्रवेशकौ ॥ २३६ ॥
वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश ।
गायत्र्युष्णिङ्मुखान्यत्र च्छन्दांसि विविधानि च ॥ २३७ ॥
त्रिशृङ्गारस्त्रिकपटः कार्यश्चायं त्रिविद्रवः ॥
वस्तु द्वादशनालीभिर्निष्पाद्यं प्रथमांकगम् ॥ २३८ ॥
द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके ।

नालिका घटिकाद्वयमुच्यते । विन्दुप्रवेशकौ च नाटकोक्तावपि नेह विधातव्यौ ।

तत्र—

धर्मार्थकामैस्त्रिविधः शृङ्गारः, कपटः पुनः ॥ २३९ ॥
स्वभाविकः कृत्रिमश्च दैवजो, विद्रवः पुनः ।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः ॥ २४० ॥

तत्र शास्त्राविरोधेन कृतो धर्मशृंगारः। अर्थलाभार्थकल्पितोऽर्थशृङ्गारः। प्रहसनशृङ्गारः कामशृङ्गारः। तत्र कामशृङ्गारः प्रथमाङ्क एव। अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना गजादयः। समवकीर्यन्ते बहवोऽर्था अस्मिन्निति समवकारः। यथा—समुद्रमंथनम्।

अथ डिमः—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
उपरागैश्च भूयिष्ठो डिमः ख्यातेतिवृत्तकः॥ २४१॥
अङ्गी रौद्ररसस्तत्र सर्वेऽङ्गानि रसाः पुनः।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ॥ २४२॥
नायका देवगन्धर्वयक्षरक्षोमहोरगाः।
भूतप्रेतपिशाचाद्याः षोडशात्यन्तमुद्धताः॥ २४३॥
वृत्तयः कैशिकीहीना निर्विमर्शाश्च संधयः।
दीप्ताः स्युः षड्रसाः शान्तहास्यशृङ्गारवर्जिताः॥२४४

अत्रोदाहरणं च 'त्रिपुरदाहः' इति महर्षिः।

अथेहामृगः—

ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्तितः।
मुखप्रतिमुखे संधी तत्र निर्वहणं तथा॥ २४५॥
नरदिव्यावनियमौ नायकप्रतिनायकौ।
ख्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत्॥२४६॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः।
शृंगाराभासमप्यस्य किंचित्किंचित्प्रदर्शयेत्॥२४७॥

पताकानायका दिव्या मर्त्या वापि दशोद्धताः ।
युद्धमानीय संरम्भं परं व्याजान्निवर्तते ॥ २४८ ॥
महात्मानो वधप्राप्ता अपि वध्याः स्युरत्र नो ।
एकांको देव एवात्र नेतेत्याहुः परे पुनः ॥ २४९ ॥
दिव्यस्त्रीहेतुकं युद्धं नायकाः षडितीतरे ।

मिश्रं ख्याताख्यातम् । अन्यः प्रतिनायकः । पताकानायकास्तु नायकप्रतिनायकयोर्मिलिता दश । नायको मृगवदलभ्यां नायिकामत्र ईहते वांछतीतीहामृगः । यथा-कुसुमशेखरविजयादिः ।

अथांकः—

उत्सृष्टिकांक एकांको नेनारः प्राकृता नराः ॥२५०॥
रसोऽत्र करुणः स्थायी बहुस्त्रीपरिदेवितम् ।
प्रख्यातमितिवृत्तं च कविर्बुद्ध्या प्रपंचयेत् ॥२५१॥
भाणवत्संधिवृत्त्यंगान्यस्मिञ्जयपराजयौ ।
युद्धं च वाचा कर्तव्यं निर्वेदवचनं बहु ॥ २५२॥

इमं च केचित् 'नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थमुत्सृष्टिकांकनामानम्' आहुः । अन्ये तु—'उत्क्रान्ता विलोमरूपा सृष्टिर्यत्रेत्युत्सृष्टिकांकः ।' यथा—शर्मिष्ठाययातिः ।

अथ वीथी—

वीथ्यामेको भवेदंकः कश्चिदेकोऽत्र कल्प्यते ।
आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितः ॥२५३॥
सूचयेद्भूरिशृंगारं किंचिदन्यान्रसान्प्रति ।
मुखनिर्वहणे संधी अर्थप्रकृतयोऽखिलाः ॥ २५४ ॥

कश्चिदुत्तमो मध्यमोऽधमो वा । शृङ्गारबहुलत्वाच्चास्याः कैशिकीवृत्तिबहुलत्वम् ।

अस्यास्त्रयोदशांगानि निर्दिशन्ति मनीषिणः ।
उद्घात्य(त)कावलगिते प्रपञ्चास्त्रिगतं छलम् ॥२५५॥
वाक्केल्यधिवले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमार्दवानि च तानि तु ॥ २५६॥

तत्रोद्घात्य(त)कावलगिते प्रस्तावनाप्रस्तावे सोदाहरणे लक्षिते ।

मिथो वाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः ।

यथा विक्रमोर्वश्याम्—वलभीस्थविदूषकचेट्योरन्योन्यवचनम् ।

त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः ॥ २५७ ॥

यथा तत्रैव—'राजा—

सर्वक्षितिभृतां नाथ, दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन्मया विरहिता त्वया ॥

(नेपथ्ये तथैव प्रतिशब्दः ।) राजा—कथं दृष्टेत्याह ।'

अत्र प्रश्नवाक्यमेवोत्तरत्वेन योजितम् । 'नटादित्रितयविषयमेवेदम्' इति कश्चित् ।

प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य च्छलना छलम् ।

यथा वेण्याम्—'भीमार्जुनौ—

कर्ता द्यूतच्छलानां, जतुमयशरणोद्दीपनः, सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् ।
कृष्णाकेशोत्तरीयव्यपनयनपटुः, पाण्डवा यस्य दासाः
क्वास्ते दुर्योधनोऽसौ कथयत, न रुषा द्रष्टुमभ्यागतौ स्वः ॥'

अन्ये त्वाहुश्छलं किंचित्कार्यमुद्दिश्य कस्यचित् ॥२५८॥
उदीर्यते यद्वचनं वञ्चनाहास्यरोषकृत् ।
वाक्केलिर्हास्यसंबन्धो द्वित्रिप्रत्युक्तितो भवेत् ॥२५९॥

द्वित्रिप्रत्युपलक्षणम् । यथा—

'भिक्षो मांसनिषेवणं प्रकुरुषे, किं तेन मद्यं विना
मद्यं चापि तव प्रियं, प्रियमहो वाराङ्गनाभिः सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं, द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो, नष्टस्य कान्या गतिः ॥'

केचित्—'प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्तिर्वाक्केलिः' इत्याहुः । अन्ये च 'अनेकस्य प्रश्नस्यैकमुत्तरम् ।'

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिबलं मतम् ।

यथा मम प्रभावत्याम्—'वज्रनाभः—

अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः ॥

प्रद्युम्नः—अरेरे असुरापसद, अलममुना बहुप्रलापेन । मम खलु

अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षतजोक्षितेयं
क्षोणिः क्षणेन पिशिताशनलोभनीया ॥'

गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः ॥ २६० ॥

यथा वेण्याम्—'राजा—

पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥'

अनन्तरम् '(प्रविश्य) कञ्चुकी—देव, भग्नं भग्नं -' इत्यादि

अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे सबद्धं संबद्धम् ।

व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ।

यथा छलितरामे—'सीता—जाद, कल्लं क्खु अम्रो-ज्झाएण गन्तव्वम्, तहिं सो राआ विणएण पणयिदव्वो। लवः—अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम्। सीता—जाद, सो क्खु तुम्हाणं पिदा। लवः—किमावयो रघुपतिः पिता सीता [साशंकम्।] मा अण्णधा संकद्धम्। ण क्खु तुम्हाणम्, सअलाए ज्जेव पुहवीएत्ति।'

प्रहेलिकैव हास्येन युक्ता भवति नालिका ॥२६१॥

संवरणकार्युत्तरं प्रहेलिका।

यथा रत्नावल्याम्—'सुसंगता—सहि, जस्स किदे तुमं आअदा सो इध ज्जेव चिट्ठदि। सागरिका—कस्स किदे अहं आअदा। सुसंगता—णं क्खु चित्तफलअस्स।'

अत्र त्वं राज्ञः कृते आगतेत्यर्थः संवृत्तः।

असत्प्रलापो यद्वाक्यमसंबद्धं तथोत्तरम्।

अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ॥२६२॥

व्याहारो यत्परस्यार्थे हास्यक्षोभकरं वचः।

यथा मालविकाग्निमित्रे—'(लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति।) विदूषकः—मा दाव उवदेससुद्धा गमिस्ससि (इत्युपक्रमेण।) दासः—(विदूषकं प्रति।) आर्य, उच्यतां यस्त्वया क्रमभेदो लक्षितः। विदूषकः—पढमं बम्भणपूआ भोदि सा इमाए लङ्घिदा। [मालविका स्मयते।]' इत्यादिना हासकारिणा वचसा व्याहारः।

दोषा गुणा गुणा दोषा यत्र स्युर्मृद[मार्दवं] हि तत् २६३

क्रमेण यथा—

'प्रिय, जीवितताक्रौर्यं निःस्नेहत्वं कृतघ्नता ।
भूयस्त्वद्दर्शनादेव ममैते गुणतां गताः ॥'
'तस्यतद्रूपसौन्दर्यं भूषितं यौवनश्रिया ।
सुखैकायतनं जातं दुःखायैव ममाधुना ॥'

एतानि चाङ्गानि नाटिकादिषु संभवन्त्यपि वीथ्यामवश्यं विधेयानि स्पष्टतया नाटिकादिषु विनिविष्टान्यपोह्योदाहृतानि वीथीव नानारसानां चात्र मालारूपतया स्थितत्वाद्वीथीयम् । यथा—मालविका ।

अथ प्रहसनम्—

भाणवत्संधिसंध्यंगलास्यांगाङ्कैर्विनिर्मितम् ।
भवेत्प्रहसनं वृत्तं निन्द्यानां कविकल्पितम् ॥२६४॥
अत्र नारभटी, नापि विष्कम्भकप्रवेशकौ ।
अंगी हास्यरसस्तत्र वीथ्यांगानां स्थितिर्न वा ।

तत्र

तपस्विभगवद्विप्रप्रभृतिष्वत्र नायकः ॥ २६५ ॥
एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते ।

यथा कन्दर्पकेलिः—

आश्रित्य कंचन जनं संकीर्णमिति तद्विदुः ॥२६६॥

यथा—धूर्तचरितम् ।

वृत्तं बहूनां धृष्टानां संकीर्णं केचिदूचिरे ।
तत्पुनर्भवति द्व्यंकमथवैकांकनिर्मितम् ॥ २६७ ॥

यथा—लटकमेलकादिः ।

विकृतं तु विदुर्यत्र षण्ढकञ्चुकितापसाः ।
भुजंगचारणभटप्रभृतेर्वेषवाग्युताः ॥ २६८ ॥

इदं तु संकीर्णे नैव गतार्थमिति मुनिना पृथङ् नोक्तम्।

अथोपरूपकाणि। तत्र—

नाटिका क्लृप्तवृत्ता स्यात्स्त्रीप्राया चतुरंकिका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥२६९॥
स्यादन्तःपुरसंबद्धा संगीतव्यापृताथवा।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥ २७० ॥
सम्प्रवर्तेत नेतास्यां देव्यास्त्रासेन शंकितः।
देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ २७१ ॥
पदे पदे मानवती तद्वशः संगमो द्वयोः।
वृत्तिः स्यात्कैशिकी स्वल्पविमर्शाः संधयः पुनः॥२७२॥

द्वयोर्नायिकानायकयोः। यथा—रत्नावली-विद्धशालभञ्जिकादिः।

अथ त्रोटकम्—

सप्ताष्टनवपञ्चांकं दिव्यामानुषसंश्रयम्।
त्रोटकं नाम तत्प्राहुः प्रत्यंकं सविदूषकम् ॥ २७३ ॥

प्रत्यङ्कसविदूषकत्वादत्र शृङ्गारोऽङ्गी। सप्ताङ्कं यथा—स्तम्भितरम्भम्। पञ्चाङ्कं यथा—विक्रमोर्वशीयम्।

अथ गोष्ठी—

प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलंकृता।
नोदात्तवचना गोष्ठी कैशिकीवृत्तिशालिनी ॥२७४॥
हीना गर्भविमर्शाभ्यां पञ्चषड्योषिदन्विता।
कामश्रृंगारसंयुक्ता स्यादेकांकविनिर्मिता ॥ २७५ ॥

यथा—रैवतमदनिका।

अथ सट्टकम्—

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ॥२७६॥
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ।

यथा—कर्पूरमञ्जरी ।

अथ नाट्यरासकम्—

नाट्यरासकमेकांकं बहुताललयस्थिति ॥ २७७ ॥
उदात्तनायकं तद्वत्पीठमर्दोपनायकम् ।
हास्योऽङ्ग्यत्र सश्रृंगारो नारी वासकसज्जिका ॥२७८॥
मुखनिर्वहणे संधी लास्यांगानि दशापि च ।
केचित्प्रतिमुखं संधिमिह नेच्छन्ति केवलम् ॥२७९॥

तत्र संधिद्वयवती यथा—नर्मवती । संधिचतुष्टयवती यथा—विलासवती ।

अथ प्रस्थानकम्—

प्रस्थाने नायको दासो हीनः स्यादुपनायकः ।
दासी च नायिका वृत्तिः कैशिकी भारती तथा ॥२८०॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः ।
अंकौ द्वौ लयतालादिर्विलासो बहुलस्तथा ॥२८१॥

यथा—शृङ्गारतिलकम्

अथोल्लाप्यम्—

उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम् ।
शिल्पकाङ्गैर्युतं हास्यशृङ्गारकरुणै रसैः ॥ २८२ ॥
उल्लाप्यं बहुसंग्रामं अस्रगीतमनोहरम् ।
चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन ॥ २८३ ॥

शिल्पकाङ्गानि वक्ष्यमाणानि । यथा—देवीमहादेवम्

अथ काव्यम्

काव्यमारभटीहीनमेकाङ्कं हास्यसंकुलम् ।
खण्डमात्राद्विपदिकाभग्नतालैरलंकृतम् ॥२८४॥
वर्णमात्राङ्कुलिकायुतं शृङ्गारभाषितम् ।
नेता स्त्रीचाप्युदात्तात्र संधी आद्यौ तथा-
न्तिमः ॥ २८५ ॥

यथ—वालिवधः ।

अथ प्रेङ्खणम्—

गर्भावमर्शरहितं प्रेङ्खणं हीननायकम् ।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम् ॥ २८६ ॥
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम् ।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ॥२८७॥

यथा—वालिवधः ।

अथ रासकम्—

रासकं पञ्चपात्रं स्यान्मुखनिर्वहणान्वितम् ।
भाषाविभाषाभूयिष्ठं भारतीकैशिकीयुतम् ॥२८८॥
असूत्रधारमेकाङ्कं सवीथ्यङ्गं फलान्वितम् ।
श्लिष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकम् ॥२८९॥
उदात्तभावविन्याससंश्रितं चोत्तरोत्तरम् ।
इह प्रतिमुखं संधिमपि केचित्प्रचक्षते ॥ २९० ॥

यथा—मेनकाहितम्

अथ संलापकम्—

संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः ।
पाषण्डः स्याद्रसस्तत्र शृङ्गारकरुणेतरः ॥ २८१ ॥
भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः ।
न तत्र वृत्तिर्भवति भारती न च कैशिकी ॥ २८२ ॥

यथा—मायाकापालिकम् ।

अथ श्रीगदितम्—

प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम् ।
प्रसिद्धनायिकं गर्भविमर्शाभ्यां विवर्जितम् ॥ २८३ ॥
भारतीवृत्तिबहुलं श्रीतिशब्देन संकुलम् ।
मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् ॥ २८४ ॥

यथा—क्रीडारसातलम् ।

श्रीरासीना श्रीगदिते गायेत्किंचित्पठेदपि ।
एकाङ्को भारतीप्राय इति केचित्प्रचक्षते ॥ २८५ ॥

ऊह्यमुदाहरणम् ।

अथ शिल्पकम्—

चत्वारः शिल्पकेऽङ्काः स्युश्चतस्रो वृत्तयस्तथा ।
अशान्तहास्याश्च रसा नायको ब्राह्मणो मतः ॥ २८६ ॥
वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः ।
सप्तविंशतिरङ्गानि भवन्त्येतस्य तानि तु ॥ २८७ ॥

आशंसातर्कसंदेहतापोद्वेगप्रसक्तयः ।
प्रयत्नग्रथनोत्कंठावहित्थाप्रतिपत्तयः ॥ २९८ ॥
विलासालस्यबाष्पाणि प्रहर्षाश्वाससूढताः ।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा ॥२९९॥
लाभविस्मृतिसम्फेटाः वैशारद्यं प्रबोधनम् ।
चमत्कृतिश्चेत्यमीषां स्पष्टत्वाल्लक्ष्म नोच्यते ॥३००॥

सम्फेटग्रथनयोः पूर्वमुक्तत्वादेव लक्ष्म सिद्धम् । यथा—कनकावतीमाधवः ।

विलासिका—

शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता ।
विदूषकविटाभ्यां च पीठमर्देन भूषिता ॥ ३०१ ॥
हीना गर्भविमर्शाभ्यां संधिभ्यां हीननायका ।
स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका ॥३०२॥

केचित्तत्र विलासिकास्थाने विनायकेति पठन्ति। तस्यास्तु 'दुर्मल्लिकायामन्तर्भावः' इत्यन्ये ।

अथ—दुर्मल्लिका—

दुर्मल्ली चतुरङ्का स्यात्कैशिकीभारतीयुता ।
अगर्भा नागरनरा न्यूननायकभूषिता ॥ ३०३ ॥
त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडामयो भवेत् ।
पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान् ॥३०४॥
षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान् ।
चतुर्थो दशनालिः स्यादङ्कः क्रीडितनागरः ॥३०५॥

यथा—बिन्दुमती ।

अथ प्रकरणिका—

नाटिकैव प्रकरणी सार्थवाहादिनायका ।

समानवंशजा नेतुर्भवेद्यत्र च नायिका ॥ ३०६ ॥

मृग्यमुदाहरणम् ।

अथ हल्लीशः—

हल्लीश एक एकांकः सप्ताष्टौ दश वा स्त्रियः ।

वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्ज्वला ।

मुखान्तिमौ तथा संधी बहुताललयस्थितिः ॥ ३०७ ॥

यथा केलिरैवतकम् ।

अथ भाणिका—

भाणिका श्लक्ष्णनेपथ्या मुखनिर्वहणान्विता ।

कैशिकीभारतीवृत्तियुक्तैकांकविनिर्मिता ॥ ३०८ ॥

उदात्तनायिका मन्दपुरुषात्रांगसप्तकम् ।

उपन्यासोऽथ विन्यासो विबोधः साध्वसं तथा ॥ ३०९ ॥

समर्पणं निवृत्तिश्च संहार इति सप्तमः ।

उपन्यासः प्रसंगेन भवेत्कार्यस्य कीर्तनम् ॥ ३१० ॥

निर्वेदवाक्यव्युत्पत्तिर्विन्यास इति स स्मृतः ।

भ्रान्तिनाशो विबोधः स्यान्मिथ्याख्यानं तु साध्वसम् ॥ ३११ ॥

सोपालम्भवचः कोपपीडयेह समर्पणम् ।

निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते ॥ ३१२ ॥

संहार इति च प्राहुर्यत्कार्यस्य समापनम् ।

स्पष्टान्युदाहरणानि । यथा—कामदत्ता ।

एतेषां सर्वेषां नाटकप्रकृतिकत्वेऽपि यथौचित्यं यथालाभं नाटकोक्तविशेषपरिग्रहः । यत्र च नाटकोक्तस्यापि पुनरुपादनं तत्र तत्सद्भावस्य नियमः ।

अथ श्रव्यकाव्यानि—

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा ॥ ३१३ ॥

तत्र पद्यमयान्याह—

छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।
द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते ॥ ३१४ ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।
सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ॥ ३१५ ॥
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ॥ ३१६ ॥
श्रृंगारवीरशान्तानामेकोऽङ्गी रस इष्यते ।
अंगानि सर्वेऽपि रसाः सर्वे नाटकसंधयः ॥ ३१७ ॥
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ॥३१८॥
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ॥३१९॥
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ॥३२०॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥३२१॥

संध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ॥ ३२२ ॥
संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥ ३२३ ॥
वर्णनीया यथायोगं सांगोपांगा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥ ३२४ ॥
नामास्य सर्गोपादेयकथया सर्गनाम तु ।

संध्यङ्गानि यथालाभमत्र विधेयानि। 'अवसानेऽन्यवृत्तकैः' इति बहुवचनमविवक्षितम् । यथा रघुवंशशिशुपालवधनैषधादयः। यथा वा मम राघवविलासादिः ।

अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः ॥३२५॥

अस्मिन्महाकाव्ये । यथा—महाभारतम् ।

प्राकृतैर्निर्मिते तस्मिन्सर्गा आश्वाससंज्ञकाः ।
छन्दसा स्कन्धकेनैतत्क्वचिद्गलितकैरपि ॥ ३२६ ॥

यथा—सेतुबन्धः । यथा वा मम — कुवलयाश्वचरितम् ।

अपभ्रंशनिबद्धेऽस्मिन्सर्गाः कुडवकाभिधाः ।
तथापभ्रंशयोग्यानि छन्दांसि विविधान्यपि ॥ ३२७॥

यथा—कर्णपराक्रमः ।

भाषाविभाषानियमात्काव्यं सर्गसमुत्थितम् ।
एकार्थप्रवणैः पद्यैः संधिसामग्र्यवर्जितम् ॥ २८ ॥

यथा—भिक्षाटनम्, आर्यविलासश्च ।

खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च ।

यथा—मेघदूतादिः ।

कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ॥ ३२९ ॥
व्रज्याक्रमेण रचितः स एवातिमनोरमः ।

सजातीयानामेकत्र संनिवेशो व्रज्या । यथा—मुक्तावल्यादिः ।

अथ गद्यकाव्यानि । तत्र गद्यम्—

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगंधि च ॥ ३३० ॥
भवेदुत्कलिकाप्रायं चूर्णकं चाचतुर्विधम् ।
आद्यं समासरहितं वृत्तभागयुतं परम् ॥ ३३१ ॥
अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ।

मुक्तकं यथा—'गुरुर्वचसि पृथुरुरसि -' इत्यादि ।

वृत्तगन्धि यथा मम—'समरकण्डूलनिबिडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटंकारोज्जागरितवैरिनगर—" इत्यादि ।

अत्र 'कुण्डलीकृतकोदण्ड—"इत्यनुष्टुब्वृत्तस्य पादः, 'समरकण्डूल' इति च प्रथमाक्षरद्वयरहितस्तस्यैव पादः ।

उत्कलिकाप्रायं यथा ममैव—'अणिसविसुमरणिसिदसरविसरविदलिदसमरपरिगदपवरपरबल—' इत्यादि ।

चूर्णकं यथा मम—"गुणरत्नसागर जगदेकनागर कामिनीमदन जनरञ्जन" इत्यादि ।

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ॥ ३३२ ॥
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥ ३३३ ॥

यथा—कादम्बर्यादिः ।

आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित्क्वचित् ॥ ३३४ ॥

कथांशानां व्यवच्छेद आश्वास इति बध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्॥३३५॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।

यथा—हर्षचरितादिः

'अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।' इति दण्डाचार्यवचनात्केचित् 'आख्यायिका नायकेनैव निबद्धव्या" इत्याहुः, तदयुक्तम् । आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः । यदुक्तं दण्डिनैव—

'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः' इति ।

एषामुदाहरणम्—पञ्चतन्त्रादिः ।

अथ गद्यपद्यमयानि—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ३३६ ॥

यथा—देशराजचरितम् ।

गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते ।

तथा—विरुदमणिमाला ।

करम्भकं तु भाषाभिर्विविधाभिर्विनिमितम् ॥ ३३७॥

यथा मम—षोडशभाषामयी प्रशस्तिरत्नावली ।

एवमन्येऽपि भेदा उद्देशमात्रप्रसिद्धत्वादुक्तभेदानतिक्रमाच्च न पृथग्लक्षिताः ॥

इति साहित्यदर्पणे दृश्यश्रव्यकाव्यनिरूपणो नाम षष्ठः परिच्छेदः ।

सप्तमः परिच्छेदः

इह हि प्रथमतः काव्ये दोषगुणरीत्यलंकाराणामवस्थितिक्रमो दर्शितः। संप्रति के त इत्यपेक्षायामुद्देशक्रमप्राप्तानां दोषाणां स्वरूपमाह—

रसापकर्षका दोषास्

अस्यार्थः प्रागेव स्फुटीकृतः।

तद्विशेषानाह—

ते पुनः पञ्चधा मताः।

पदे तदंशे वाक्येऽर्थे संभवन्ति रसेऽपि यत् ॥१॥

स्पष्टम्।

तत्र—

दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः।
ग्राम्याप्रतीतसंदिग्धनेयार्थनिहतार्थताः ॥२॥
अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता।
अविमृष्टविधेयांशभावश्च पदवाक्ययोः ॥ ३ ॥
दोषा, केचिद्भवन्त्येषु पदांशेऽपि, पदे परे।
निरर्थकासमर्थत्वे च्युतसंस्कारता तथा ॥४॥

परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम्।

यथा—

कार्तार्थ्यं सङ्गतः पुंसः प्रपद्येत कथन्न वा।

अश्लीलत्वं व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्त्रिविधम्

यथा—

प्रससार शनैर्वायुर्विनाशे नाथ ते तदा ।

अत्र वायु-विनाशब्दौ अश्लीलामंगलौ ।

'शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।

अत्र पशुपदं कातर्यमभिव्यनक्तीत्यनुचितार्थम् ।

अप्रयुक्तत्वं तथाप्रसिद्धावपि कविभिरनादृतत्वम् । यथा—

'भाति पद्मः सरोवरे ।'

अत्र पद्मशब्दः पुंलिङ्गः ।

ग्राम्यत्वं यथा—

'कटिस्ते हरते मनः ।'

अत्र कटिशब्दो ग्राम्यः ।

अप्रतीतत्वमेकदेशमात्रप्रसिद्धत्वम् । यथा—

'योगेन दलिताशयः ।'

अत्र योगशास्त्र एव वासनार्थ आशयशब्दः ।

'आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ।'

अत्र वन्द्यामिति किं वन्दीभूतायामुत वन्दनीयायामिति संदेहः

नेयार्थत्वं रूढिप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थप्रकाशनम्

यथा—

'कमले चरणाघातं मुखं सुमुख तेऽकरोत् ।'

अत्र चरणघातेन निर्जितत्वं लक्ष्यम् ।

निहतार्थत्वमुभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः । यथा—

'यमुनाशम्बरमम्बरं व्यतानीत् ।'

शम्बरशब्दो दैत्ये प्रसिद्धः । इह तु जले निहतार्थः ।

'गीतेषु कर्णमादत्ते'

अत्राङ् पूर्वो दाञ् धातुर्दानार्थेऽवाचकः ।'

यथा वा—

'दिनं मे त्वयि संप्राप्ते ध्वान्तच्छन्नापि यामिनी ।'

अत्र दिनमिति प्रकाशमयार्थेऽवाचकम् ।

क्लिष्टत्वमर्थप्रतीतेर्व्यवहितत्वम् । यथा—

'क्षीरोदजावसतिजन्मभुवः प्रसन्नाः ।'

अत्र क्षीरोदजा लक्ष्मीस्तस्या वसतिः पद्मं तस्य जन्मभुवो जलानि ।

'भूतयेऽस्तु भवानीशः'

अत्र भवानीशशब्दो भवान्याः पत्यन्तरप्रतीतिकारित्वाद्विरुद्धमतिकृत् । **अविमृष्टविधेयांशत्वं** यथा—

'स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ।'

अत्र वृथात्वं विधेयम्, तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत् ।

यथा वा—

'रक्षांस्यपि पुरः स्थातुमलं रामानुजस्य मे ।'

अत्र रामस्येति वाच्यम् । यथा वा—

'आसमुद्रक्षितीशानाम्

अत्रासमुद्रमिति वाच्यम् । यथा वा

"अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा ।"

अत्रामुक्तेत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम् ।

यदाहुः—

'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥'

यथा— 'नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः।

उक्तोदाहरणे तु तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतयानवगमः। यदाहुः—

'प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥

तेन

'जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत्॥

अत्रात्रस्ततात्ताद्यनूद्यात्मगोपनाद्येव विधेयमिति नञः पर्युदासतया गुणीभावो युक्तः।

ननु 'अश्राद्धभोजो ब्राह्मणः, असूर्यंपश्या राजदाराः' इत्यादिवत् 'अमुक्ता' इत्यत्रापि प्रसज्यप्रतिषेधो भवतीति चेत् न। अत्रापि यदि भोजनादिरूपक्रियांशेन नञः संबन्धः स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम्। न च तथा। विशेष्यतया प्रधानेन तद्भोज्यार्थेन कत्रंशेनैव नञः संबन्धात्। यदाहुः—

'श्राद्धभोजनशीलो हि यतः कर्ता प्रतीयते।
न तद्भोजनमात्रं तु कर्तरीनेर्विधानतः॥ इति।

'अमुक्ता' इत्यत्र तु क्रिययैव सह संबन्ध इति दोष एव। एते च क्लिष्टत्वादयः समासगता एव पददोषाः।

वाक्ये दुःश्रवत्वं यथा—

'मौर्व्यान्धः कदा लप्स्ये कार्तार्थ्यं विरहे तव।'

"कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते॥"

अत्र जुगुप्साव्यञ्जकाश्लीलता।

'उद्यत्कमललौहित्यैर्वक्त्राभिर्भूषिता तनुः।'

अत्र कमललौहित्यं पद्मरागः । वक्राभिर्वामाभिः । इति नेयार्थता ।

'धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं सुरापगातीरे ।

रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम् ॥'

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति संबन्धः क्लिष्टः ।

'न्यक्कारो ह्ययमेव मे यत्' इति । अत्र चायमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम् । तच्च शब्दरचनावैपरीत्येन गुणीभूतम् । रचना च पदद्वयस्य विपरीतेति वाक्यदोषः ।

'आनन्दयति ते नेत्रे योऽसौ मित्र समागतः ।'

इत्यादिषु 'यत्तदोर्नित्यः संबन्धः' इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमाना इदमेतददःशब्दा विधेया एव भवितुं युक्ताः । अत्र तु यच्छब्दनिकटस्थितस्य अनुवाद्यत्वप्रतीतिकृत् । तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम् । यथा—

'यः स ते नयनानन्दकरो मित्र स आगतः ।'

यच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षत्वमवगमयन्ति । यथा—

'आनन्दयति ते नेत्रे योऽधुनासौ समागतः ॥'

एवमिदमादिशब्दोपादानेऽपि । यत्र च यत्तदोरेकस्यार्थत्वं संभवति, तत्रैकस्योपादानेऽपि निराकाङ्क्षत्वप्रतीतिरिति न क्षतिः । तथाहि यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम् । यथा—

'आत्मा जानाति यत्पापम्'

एवम्—

'यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधींश्च—'

इत्यादावपि ।

तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वम् । क्रमेण यथा—

'स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥'

'स वः शशिकलामौलिस्तादात्म्यायोपकल्प्यताम् ।'

'तं चन्द्रसुन्दरमुखं हृदि चिन्तयामि ।'

यत्र च यच्छब्दनिकटस्थितानामपीदमादिशब्दानां भिन्नलिङ्गविभक्तित्वं तत्रापि निराकाङ्क्षत्वमेव ।

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमः । यथा—

'न मे शमयिता कोऽपि भारस्येत्युर्वि मा शुचः ।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः ॥'

अत्र योऽस्ति, स ते भारस्य शमयितेति बुध्यते ।

'यद्यद्धृदयदुःखं मे तत्को वापहरिष्यति ।'

इत्यत्रैको यच्छब्दः साकाङ्क्ष इति न वाच्यम् । तथाहि—यद्यदित्यनेन केनचिद्रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम् । तथाभूतस्य तस्य तच्छब्देन परामर्शः । एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम् ।

पदांशे श्रुतिकटु यथा—

'तद्गच्छ सिद्ध्यै कुरु देवकार्यम् ।'

'धातुमत्तां गिरिधत्ते ।'

अत्र मत्ताशब्दः क्षीबार्थे निहतः।

'वर्ण्यते किं महासेनो विजेयो यस्य तारकः।'

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः।

'पाणिः पल्लवपेलवः।'

पेलवशब्दस्याद्याक्षरे अश्लीले।

'संग्रामे निहताः शूरा वचोबाणत्वमागताः।'

अत्र वचःशब्दस्य गोशब्दवाचकत्वे नेयार्थत्वम्। तथा तत्रैव बाणस्थाने शरेति पाठे। अत्र पदद्वयमपि न परिवृत्तिसहम् जलध्यादौ तूत्तरपदम्वाडवानलादौ पूर्वपदम्। एवमन्येऽपि यथासंभवं पदांशदोषा ज्ञेयाः। निरर्थकत्वादीनां त्रयाणां च पदमात्रगतत्वेनैव लक्ष्ये संभवः। क्रमतो यथा—

'मुञ्च गर्वं हि भद्रक!

अत्र हिशब्दो वृत्तिपूरणमात्रप्रयोजनः।

'युद्धं हन्ति वृकोदरः।

अत्र हन्तीति गमनार्थे पठितमपि न तत्र समर्थम्।

'गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः।

'आङो यमहनः' 'स्वाङ्गकर्मकाच्च,' इत्यनुशासनबलादाङ्-पूर्वस्य हनः स्वाङ्गकर्मकस्यैवात्मनेपदत्वं नियमितम्। इह तु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम्।

नन्वत्र 'आजघ्ने' इति पदस्य स्वतो न दुष्टता, अपि तु पदान्तरापेक्षयैव, इत्यस्य वाक्यदोषता। मैवम्। तथा हि गुणदोषालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरे-

कानुविधायित्वं हेतुः। इह तु दोषस्य 'अजघ्ने' इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम्। पदान्तराणां परिवर्तनेऽपि तस्य तादवस्थ्यादेव इति पददोषः, तथा हन्प्रकृतेरपीति न पदांशदोषः।

एवं 'पद्मः इत्यप्रयुक्तस्य पदगतत्वं बोध्यम्। एवं भाक्तादिव्याकरणलक्षणहानावपि च्युतसंस्कारत्वमूह्यम्।

इह तु शब्दानां सर्वथा प्रयोगाभावेऽसमर्थत्वम्। विरलप्रयोगे निहतार्थत्वम्। निहतार्थत्वमनेकार्थशब्दविषयम्। अप्रतीतत्वं त्वेकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगविरहः। अप्रयुक्तत्वमेकार्थशब्दविषयम्।

असमर्थत्वमनेकार्थशब्दविषयम्। असमर्थत्वे हन्त्यादयो गमनार्थे पठिताः। अवाचकत्वे दिनादयः प्रकाशमयाद्यर्थे, न तथेति परस्परभेदः। एवं पददोषसजातीया वाक्यदोषा उक्ताः संप्रति तद्विजातीया उच्यन्ते।

वर्णानां प्रतिकूलत्वं, लुप्ताहतविसर्गते
अधिकन्यूनकथितपदताहतवृत्तताः ॥ ५ ॥
पतत्प्रकर्षता, संधौ विश्लेषाश्लीलकष्टताः।
अर्धान्तरैकपदता समाप्तपुनरात्तता ॥ ६ ॥
अभवन्मतसंबन्धाक्रमामतपरार्थताः।
वाच्यस्यानभिधानं च भग्नप्रक्रमता तथा ॥ ७॥
त्यागः प्रसिद्धेरस्थाने न्यासः पदसमासयोः।
संकीर्णता गर्भितता दोषाः स्युर्वाक्यमात्रगाः ॥८

वर्णानां रसानुगुण्यविपरीतत्वं प्रतिकूलत्वम् । यथा —

स तस्य सुन्दरं कायं पातयामास सत्वरम्

अत्रवीररसाननुकूलो वर्णविन्यासः ।

'गता निशा इमा बाल ।

अत्र लुप्तविसर्गः । आहता ओत्वं प्राप्ता विसर्गा यत्र । यथा—

'धीरो वरो नरो याति इति ।

'पल्लवाकृतिरक्ताोष्ठः ।

अत्राकृतिपदमधिकम् । एवम्—

'सदाशिवं नौमि पिनाकपाणिम् ।

इति विशेषणमधिकम् ।

'कुर्यां हरस्यापि पिनाकपाणेः' इति ।

अत्र तु पिनाकपाणिपदं विशेष्यतात्पर्यार्थमुपात्तमिति युक्तमेव । यथा वा —

'वाचमुवाच कौत्सः ।'

अत्र वाचमित्यधिकम् । उवाचेत्यनेनैव गतार्थत्वात् ।

क्वचित्तु विशेषणदानार्थं तत्प्रयोगो युज्यते । यथा —

'उवाच मधुरां वाचम्' इति ।

केचित्त्वाहुः—यत्र विशेषणस्यापि क्रियाविशेषणत्वंसंभवति तत्रापि तत्प्रयोगो न घटते । यथा—

'उवाच मधुरं धीमान्' इति ।

'यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा ।'

अत्र प्रथमे त्वयेति पदं न्यूनम् ।

'खेलत्खेलाश्रमं भित्वा कल्लोलमालो वहन् ।'

लीलाशब्दः पुनरुक्तः। एवम्—

'जन्तु विसं धृतविकासिबिसप्रसूनाः।'

अत्र विसशब्दस्य धृतपरिस्फुटतत्प्रसूना इति सर्वनाम्नैव परामर्शो युक्तः। हतवृत्तं लक्षणानुसरणेऽप्यश्रव्यं, रसाननुगुणम-प्राप्तगुरुभावान्तलघु च। यथा—

हन्त सततमिह भूमौ भवति हि बहुपापकर्मणां वृद्धिः'

'वीर समर्थय शस्त्रमन्त्रम्'

इदं वृत्तं हास्यरसस्यैवानुकूलम्।

'विकसितसहकारभारहारिपरिमल एष समागतो वसन्तः। अत्र पादान्ते लघोरपि गुरुभाव उक्तस्तत्सर्वत्र द्वितीयचतुर्थपादविषयम्। प्रथमतृतीयपादविषयं तु वसन्ततिलकादेरेव। अत्र 'प्रमुदितसौरभ आगतो वसन्तः' इति पाठो युक्तः।

वस्तुतस्तु 'लक्षणानुसरणेऽप्यश्रव्यम्' इत्यन्ये।

'प्रोज्ज्वलज्ज्वलनज्वालाविकटोरुसटाच्छटः।

श्वासक्षिप्तकुलक्ष्माभृत्पातु वो नरकेसरी॥'

अत्रक्रमेणानुप्रासप्रकर्षः पतितः।

'दलिते उत्पले एते चक्षुषी वासुदेव ते।'

एवंविधसंधिविश्लेषस्यासकृत्प्रयोग एव दोषः। अनशापनमुल्लङ्घ्यवृत्तभङ्गमात्रेण संधिविश्लेषस्य तु सकृदपि। यथा—

वासवाशामुखे भाति इन्दुश्चन्दनबिन्दुवत्।'

'चलण्डामरचेष्टितः' इति।

अत्र संधौ जुगुप्साव्यञ्जकमश्लीलत्वम्।

'उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।'

अत्र संधौ कष्टत्वम् ।

'इन्दुर्विभाति कर्पूरगौरैर्धवलयन्करैः ।

जगत्—

अत्र जगदिति प्रथमार्धे पठितुमुचितम् ।

'नाशयन्तो घनध्वान्तं मोदयन्तः प्रजाजनम्

पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥'

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरात्तः ।

अभवन्मतसंबन्धो यथा—

'ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च ।

राजति व्योमकासारे राजहंसः सुधाकरः ॥'

अत्र व्योमकासारशब्दस्य समासे गुणीभावात्तदर्थस्य न सर्वैः संयोगः ।

विधेयाविमर्शे यदेवाविमृष्टं तदेव दुष्टम् । इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयःपूरादिपदार्थस्तदङ्गतया न प्रतीयते, इति सर्ववाक्यार्थविरोधावभासः । इत्युभयोर्भेदः ।

'अनेन च्छिन्दता मातुः कण्ठं परशुना तव ।

बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव ॥'

अत्र भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनस्य परशुना सह संबन्धो न युक्त इति प्राञ्चः । परशुनिन्दामुखेन भार्गवनिन्दाधिक्यमेव वैदग्ध्यं द्योतयतीत्याधुनिकाः ।

अक्रमता यथा—

'समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम् ।

शरदि हंसरवाः परुषीकृतस्वरमयूरमयूं रमणीयताम् ॥

अत्र परामृश्यमानवाक्यानन्तरमेवेतिशब्दोपयोगो युज्यते, न

तु प्रणिगदन्त इत्यनन्तरम् । एवम्—

'द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्र-
कौमुदी ॥'

अत्र त्वमित्यनन्तरमेव चकारो युक्तः ।

अमतपरार्थता यथा—

'राममन्मथशरेण ताडिता' इत्यादि ।

अत्र शृंगाररसस्य व्यञ्जको द्वितीयोऽर्थः प्रकृतरसविरोधित्वादनिष्टः ।

वाच्यस्यानभिधानं यथा—

'व्यतिक्रमलवं कं मे वीक्ष्य भद्रक कुप्यसि ।'

अत्र व्यतिक्रमलवमपीत्यपिरवश्यं वक्तव्यो नोक्तः । न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता । अपेस्तु न तथात्वमित्यनयोर्भेदः । एवमन्यत्रापि ।

भग्नप्रक्रमता यथा—

'एवमुक्तो मन्त्रिमुख्यैः रावणः प्रत्यभाषत ।'

अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितम् । तेन 'रावणः प्रत्यवोचत' इति पाठो युक्तः । एवं च सति न कथितपदत्वदोषः । तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयकत्व तु । इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देशत्वम् । यथा—

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।'

इत्यत्र हि यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति ।

यथा वा—

‘ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥’

अत्र ‘अस्मै’ इतीदमा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतदद:शब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन । यथा वा—

‘उदन्वच्छन्ना भूः स च पतिरपां योजनशतम्’

अत्र ‘मिता भूः पत्यापां स च पतिरपाम्’ इति युक्तः पाठः। एवम्—

‘यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥’

अत्र ‘सुखमीहितुम्’ इत्युचितम् । अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः । तृतीये पर्यायविषयः, चतुर्थे प्रत्ययविषयः । एवमन्यत्रापि ।

प्रसिद्धित्यागो यथा—

‘घोरो वारिमुचां रवः ।’

अत्र मेघानां गर्जितमेव प्रसिद्धम् ।

यदाहुः—

‘मंजीरादिषु रणितप्रायं पक्षिषु तु कूजितप्रभृति ।
मेघादिषु गर्जितप्रमुखम् ॥’ इत्यादि ।

अस्थानस्थपदता यथा—

‘तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः ॥’

अत्र तदीयपदात्पूर्वं गङ्गामित्यस्य पाठो युक्तः । एवम् —

'हिनाम्न यः संशृणुते स किं प्रभुः '

अत्र संशृणुत इत्यतः पूर्वं नञः स्थितिरुचिता ।।

अत्र च पदमात्रस्यास्थाने निवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरमिति वाक्यदोषता । एवमन्यत्रापि । इह केऽप्याहु:—'पदशब्देन वाचकमेव प्रायो निगद्यते, न च नञो वाचकता निर्विवादात्स्वातन्त्र्येणार्थबोधनविरहात्' इति । यथा-'द्वयं गतम्—' इत्यादौ त्वमित्यनन्तरं चकारानुपादानादक्रमता तथात्रापीति ।

अस्थानस्थसमासता यथा—

अस्माद् घोरजगज्जालमयदुःखपयोनिधेः

विरक्ता ये जनाः सन्तस्ते सदाशयसम्पदः ॥

अत्र व्यर्थ एव दीर्घसमासः ।

वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः संकीर्णत्वम् यथा-

आज्ञां सीतां पितु र्लब्ध्वा वनमादाय सोऽगमत् ।

वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता यथा—

परापकारनिरतैर्दुर्जनैः सह संगतिः ।

वदामि भवतस्तत्त्वन्नविधेया कदाचन ॥

अर्थदोषानाह—

अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः ।

अनवीकृतनिर्हेतुप्रकाशितविरुद्धताः ॥ ९ ॥

संदिग्धपुनरुक्तत्वे ख्यातिविद्याविरुद्धते ।

साकांक्षता सहचरभिन्नतास्थानयुक्तता ॥ १० ॥

अविशेषे विशेषश्चानियमे नियमस्तथा ।

तयोर्विपर्ययौ विध्यनुवादोक्तते यथा ॥ ११ ॥

निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्तिताः ।

तद्विपर्ययो विशेषेऽविशेषो नियमेऽनियमः । **अत्रापुष्टत्वं** मुख्यानुपकारित्वम् । यथा—

नमस्तेऽस्तु जगन्नाथ ! विशालपृथिवीपते !

अत्र विशालपदं व्यर्थमपुष्टिकरं च ।

दुष्क्रमता यथा—

'देहि मे वाजिनं राजन्गजेन्द्रं वा मदालसम् ।'

अत्र गजेन्द्रस्य प्रथमं याचनमुचितम् ।

यदि त्वं चाटुकारोऽसि कुक्कुरोऽसि न संशयः ।

अत्रार्थो ग्राम्यः ।

कस्यचित्प्रागुत्कर्षमपकर्षं वाभिधाय पश्चात्तदन्यप्रतिपादनं व्याहतत्वम् । यथा—

'हरन्ति हृदयं तेषां न नवेन्दुकलादय ।
वीक्ष्यते यैरियं देवो लोकलोचनचन्द्रमाः॥'

अत्र येषामिन्दुर्नानन्दहेतुस्तेषामेवानन्दायचन्द्रत्वारोपः ।

येषां विनिन्दितं कर्म यतः स्याद्दुष्फलं बहु ।
यद्धोगाभिरवश्रते जन्तुस्ते यान्ति विषमां गतिम् ।

अत्रार्थः कष्टः ।

'सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्त भुवं शेषः सदा धीरोऽविकत्थनः ॥'

अत्र सदेत्यनवीकृतत्वम् । अत्रास्य पदस्य पर्यायान्तरेणोपादानेऽपि यदि नान्यद्विच्छित्त्यन्तरं तदास्य दोषस्य सद्भाव इति कथितपदत्वाद्भेदः ।

नवीकृतत्वं यथा—

'भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिवं गन्धवहः प्रयाति ।
बिभर्ति शेषः सततं धरित्रीं षष्ठांशवृत्तेरपि धर्म एषः ॥'

"गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥"

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति निर्हेतुत्वम् ।

'कुमारस्ते नराधीश श्रियं समधिगच्छतु ।'

अत्र 'त्वं म्रियस्व' इति विरुद्धार्थप्रकाशनात्प्रकाशितविरुद्धत्वम् ।

'अचला धनिनो वा स्युः सेव्या ब्रूत मनीषिणः ।'

अत्र प्रकरणाभावाच्छान्तदरिद्रयोः को वक्तेति निश्चयाभावात्संदिग्धत्वम् ।

'सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥'

अत्र द्वितीयार्धव्यतिरेकेण द्वितीयपादस्यैवार्थ इति पुनरुक्तता प्रसिद्धिविरुद्धता ।

'ततश्चचार समरे शितशूलधरो हरिः ।'

अत्र हरेः शूलं लोके ऽप्रसिद्धम् ।

'अज्ञानी मोक्षमाप्तवान् ।'

अत्र योगशास्त्रविरुद्धत्वाद्विरुद्धता । एवमन्यशास्त्रविरुद्धत्वमपि ।

'ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम् ।
स्त्रीरत्नं च कथं नाम मृष्यते भार्गवोऽधुना ॥'

अत्र स्त्रीरत्नमपेक्ष्य नृपतिसाकांक्षता ।

'सज्जनो दुर्गतौ मग्नः गौश्च म्लेच्छवशं गता ।
खलः पूज्यः समज्यायां तापाय मम चेतसः ॥'

अत्र सज्जनः गौश्च शोभनौ, तत्सहचरः खलोऽशोभन इति सहचरभिन्नत्वम् ।

'आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥'

अत्र न रावण इत्येतावतैव समाप्यम् ।

'हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।'

अत्र रत्नानां निधेरित्यविशेष एव वाच्यः ।

जलभूरेव पाणिस्ते ।

अत्र जलभूरेवेति नियमो न वाच्यः ।

स्तेनाः द्रव्यापहाराय भ्रमन्ति निशि संहताः ।

अत्र तमिस्रायामिति रजनीविशेषो वाच्यः ।

'आपातसुरसे भोगे निमग्नाः किं न कुर्वते ।'

अत्र आपात एवेति नियमो वाच्यः ।

ननु वाच्यस्यानभिधाने 'व्यतिक्रमलवम्' इत्यादावपेरभावः, इह चैवकारस्येति कोऽनयोर्भेदः । अत्राह—'नियमस्य वचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः इति, तन्न । तथा सत्यपि द्वयोः शब्दार्थदोषतायां नियामकाभावात् । तत्का गतिरिति चेत्, 'व्यतिक्रमलवम्' इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः इह त्वर्थप्रत्ययानन्तरमिति भेदः । एवं च शब्दपरि-

वृत्तिसहत्वासहत्वाभ्यां पूर्वैरादृतोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति—यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव। यश्च पदार्थान्वयप्रतीतिपूर्वं बोध्यः सोऽपि शब्ददोषः। यश्चार्थप्रतीत्यनन्तरं बोध्यः सोऽर्थाश्रय इति। एवं चानियमपरिवृत्तित्वादेरप्यधिकपदत्वादेर्भेदो बोद्धव्यः। अमतपरार्थत्वे तु 'राममन्मथशरेण-,इत्यादौ नियमेन वाक्यव्यापित्वाभिप्रायाद्वाक्यदोषता। अश्लीलत्वादौ तु न नियमेन वाक्यव्यापित्वम्।

'आनन्दितस्वपक्षोऽसौ परपक्षान्हनिष्यति।

अत्र परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति विधेयम्।

चण्डीशचूडाभरण चन्द्र लोकतमोपह।

विरहिप्राणहरण कदर्थय न मां वृथा॥,

अत्र विरहिण उक्तौ तृतीयपादस्यार्थो नानुवाद्यः॥

लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।
तत्सक्तोऽयं न किंचिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवाम्बुधिं यस्य कीर्तिः॥

अत्र विदितं तेऽस्त्वित्यनेन समापितमपि वचनं तेनेत्यादिना पुनरुपात्तम्।

अथ रसदोषानाह—

रसस्योक्तिः स्वशब्देन स्थायिसंचारिणोरपि॥ १२॥
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः।
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः॥ १३॥
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः।

अंगिनोऽननुसंधानमनंगस्य च कीर्तनम् ॥ १४ ॥
अतिविस्तृतिरंगस्य प्रकृतीनां विपर्ययः ।
अर्थानौचित्यमन्यच्च दोषा रसगता मताः ।

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च । दिङ्मात्रं यथा—

तमुद्यतं रिपुन्दृष्ट्वा रसो नः कोप्यजायत ।
तस्य ध्वजं समुद्वीक्ष्य वीरे मग्नन्तु मानसम्

स्थायिभावस्य स्वशब्दवाच्यत्वं यथा—

सम्प्रहारे प्रहरणैः प्रहाराणां परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ॥

प्रतिकूलविभावादिग्रहो यथा—

शस्त्रं प्रहर भो वीर सग्रामे मरणन्ध्रुवम् ।

अकाण्डे प्रथन यथा—वेणीसंहारे द्वितीयेऽङ्के प्रवर्तमानानेकवीरसंक्षये दुर्योधनस्य भानुमत्या सह शृङ्गारप्रथनम् ।

छेदो यथा—वीरचरिते राघवभार्गवयोर्धाराधिरूढेऽन्योन्यसंरम्भे कङ्कणमोचनाय गच्छामीति राघवस्योक्तिः ।

पुनः पुनर्दीप्तिर्यथा—कुमारसंभवे रतिविलापे ।

अङ्गिनोऽननुसंधानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः ।

अनङ्गस्य कीर्तनं यथा—कर्पूरमञ्जर्यां राजनायिकयोः स्वयं कृतं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसनम् ।

अङ्गस्यातिविस्तृतिर्यथा—किराते सुरांगनाविलासादिः ।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्चेति । तेषां धीरोदात्तादिता । तेषामप्युत्तमाधममध्यमत्वम् । तेषु च यो यथाभूतस्तस्यायथावर्णने प्रकृतिविपर्ययो दोषः । यथा—धीरोदात्तस्य रामस्य धीरोद्धतवच्छद्मना वालिवधः । यथा वा—कुमारसंभवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः संभोगशृङ्गारवर्णनम् । 'इदं पित्रोः संभोगवर्णनमिवात्यन्तमनुचितम्' इत्याहुः ।

अन्यदनौचित्यं देशकालादीनामन्यथा यद्वर्णनम् । तथा सति हि काव्यस्यासत्यताप्रतिभासेन विनेयानामुन्मुखीकारासंभवः ।

एभ्यः पृथगलंकारदोषाणां नैव संभवः ॥ १५ ॥

एभ्य उक्तदोषेभ्यः । तथा हि—उपमायामसादृश्यासंभवयोरुपमानस्य जातिप्रमाणगतन्यूनत्वाधिकत्वयोरर्थान्तरन्यासे उत्प्रेक्षितार्थसमर्थने चानुचितार्थत्वम् । क्रमेण यथा—

'ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।'

'प्रज्वलज्जलधारावन्निपतंति शरास्तव ।

'चण्डाल इव राजासौ संग्रामेऽधिकसाहसः ।'

'कर्पूरखण्ड इव राजति चन्द्रबिम्बम् ।'

हरवन्नीलकण्ठोऽयं विराजति शिखावलः ।

'दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव ॥

एवमादिषूत्प्रेक्षितार्थस्यासंभूयतयैव प्रतिभासनं स्वरूपमित्यनुचितमेव तत्समर्थनम् ।

उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेऽवाचकत्वम् । यथा—

एष मूर्तो यथा धर्मः क्षितिपो रक्षति क्षितिम् ।

एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वम् । यथा—

ओवट्टइ उल्लट्टइ—इत्यादौ ।

उपमायां च साधारणधर्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनपदत्वं च । क्रमेणोदाहरणम्—

'नयनज्योतिषा भाति शंभुर्भूतिसितद्युतिः ।
विद्युतेव शरन्मेघो नीलवारिदखण्डधृक् ॥'

अत्र भगवतो नीलकण्ठत्वस्याप्रतिपादनाच्चतुर्थपादोऽधिकः ।

'कमलालिङ्गितस्तारहारहारी मुरं द्विषन् ।
विद्युताभूषितो नीलजीमूत इव राजते ॥'

अत्रोपमानस्य सबलाकत्वं वाच्यम् ।

अस्यामेवोपमानोपमेययोर्लिङ्गवचनभेदस्य कालपुरुषविध्यादिभेदस्य च भग्नप्रक्रमत्वम्, क्रमेणोदाहरणम्—

'सुधेव विमलश्चन्द्रः ।'

'ज्योत्स्ना इव सिता कीर्तिः ।'

'काप्यभिख्या तयोरासीद्‌व्रजतोः शुद्धवेशयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥'

अत्र तथाभूतचित्राचन्द्रमसोः शोभा न खल्वासीत् । अपि तु सर्वदापि भवति ।

'लतेव राजसे तन्वि ।'

अत्र लता राजते, त्वं तु राजसे ।

'चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा ।'

अत्र मार्कण्डेयमुनिर्जीवत्येव । न खल्वेतदस्य जीवत्वित्यनेन विधेयम् ।

इह तु यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः। उदाहृतम्—

'मुखं चन्द्र इवाभाति।'

एवं समासोक्तौ साधारणविशेषणवशात्परार्थस्य प्रतीतावपि पुनस्तस्य शब्देनोपादानस्याप्रस्तुतप्रशंसायां व्यञ्जनयैव प्रस्तुतार्थावगतेः शब्देन तदभिधानस्य च पुनरुक्तत्वम्।

दिङ्मात्रं यथा—

'आहूतेषु विहङ्गमेषु मशको नायान्पुरो वार्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक्सामान्यमचेतसं प्रभुमिवानामृष्टतत्त्वान्तरम्॥'

अत्राचेतसः प्रभोरभिधानमनुचितम्।

एवमनुप्रासे प्रसिद्ध्यभावस्य ख्यातविरुद्धत्वम्। यथा—

चक्राधिष्ठिततां चक्री गोत्रं गोत्रभिदुच्छ्रितम्।
वृषं वृषभकेतुश्च प्रायच्छन्नस्य भूभुजः।"

उक्तदोषाणां च क्वचिददोषत्वं क्वचिद्गुणत्वमित्याह—

वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्॥१६॥

एषु चास्वादस्वरूपविशेषात्मकतया मुख्यगुणप्रकर्षोपकारित्वाद्गुण इति व्यपदेशो भाक्तः। क्रमेण यथा—

'तद्विच्छेदकृशस्य कण्ठलुठितप्राणस्य मे निर्दयं
क्रूरः पञ्चशरः शरैरतिशितैर्भिन्दन्मनो निर्भरम्।
शंभोर्भूतकृपाविधेयमनसः प्रोद्दामनेत्रानल-

ज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना ॥'

अत्र श्रृङ्गारे कुपितो वक्ता।

'मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-

द्धूताम्भः क्षोददम्भात्प्रसभमभिनभःक्षिप्तनक्षत्रलक्षम्।

ऊर्ध्वन्यस्ताङ्घ्रिघूर्णद्भ्रमरभसोद्यत्‌भस्वत्प्रवेग-

भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शांभवं ताण्डवं वः॥'

अत्रोद्धतताण्डवं वाच्यम्। इमे पद्ये मम। रौद्रादिरसत्वे तद्विद्वतयापेक्षयापि दुःश्रवत्वम युक्त गुणः। यथा—

'उत्कृत्योत्कृत्य कृत्तम्—' इत्यादि।

अत्र बीभत्सो रसः।

स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते ॥१७॥

यथा—

'पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतंगहनम्।

हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ॥'

अत्रेन्द्रपक्षे पवित्रशब्दो निहतार्थः। सिंहपक्षे मतङ्गशब्दो मातङ्गार्थेऽप्रयुक्तः।

गुणः स्यादप्रतीतत्वं ज्ञत्वं चेद्वक्तृवाच्ययोः।

यथा—

'त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम्।

त्वद्दर्शनमुदासीनं त्वामेव पुरुषं विदुः ॥'

स्वयं वापि परामर्शे

अप्रतीतत्वं गुण इत्यनुषज्यते। यथा—

'युक्तः कलाभिस्तमसां विवृद्ध्यै क्षीणश्च ताभिः क्षतये य एषाम्।

शुद्धं निरालम्बपदावलम्बं तमात्मचन्द्रं परिशीलयामि ॥'

कथितं च पदं पुनः ॥१८॥

विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ।
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने ॥१९॥
अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे ।

गुण इत्येव । यथा—

'उदेति सविता ताम्रः' इत्यादि ।

अत्र विहितानुवादः ।

'हन्त हन्त गतः कान्तो वसते सखि नागतः ।'

अत्र विषादः ।

'चित्रं चित्रमनाकाशे कथं सुमुखि चन्द्रमाः ।'

अत्र विस्मयः ।

'सुनयने नयने निधेहि—' इति ।

अत्र लाटानुप्रासः ।

'नयने तस्यैव नयने च ।'

इत्यादावर्थान्तरसंक्रमितवाच्यो ध्वनिः । एवमन्यत्र ।

संदिग्धत्वं तथा व्याजस्तुतिपर्यवसायि चेत् ॥२०॥

गुण इत्येव । यथा—

'पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥'

वैयाकरणमुख्ये तु प्रतिपाद्येऽथ वक्तरि ।
कष्टत्वं दुःश्रवत्वं वा

'दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते ॥'

अत्रार्थः कष्टः । वैयाकरणश्च वक्ता । एवमस्य प्रतिपाद्यत्वेऽपि ।

'अयाऽस्थापर्मुपाध्यायं त्वामहं न कदाचन ।'

अत्र दुःश्रवत्वम् । वैयाकरणो वाच्यः । एवमस्य वक्तृत्वेऽपि ।

ग्राम्यत्वमधमोक्तिषु ॥ २१ ॥

गुण इत्येव । यथा मम—

'एसो ससहरबिम्बो दीसइ हेअङ्गवीणपिण्डो व्व ।
एदे अस्समयोहा पडन्ति आसासु दुद्धधार व्व ॥'

इयं विदूषकोक्तिः ।

निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति ।

यथा—

'संप्रति संध्यासमयश्चक्रद्वन्द्वानि विघटयति ।'

कवीनां समये ख्याते गुणः ख्यातविरुद्धता ॥२२॥

कविसमयख्यातानि च—

**मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्योः
रक्तौ च क्रोधरागौ, सरिदुदधिगतं पंकजेन्दीवरादि ।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसंघो
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः॥२३
पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यै-
र्यूनामंगेषु हाराः, स्फुटति च हृदयं विप्रयोगस्य तापैः ॥२४**

अह्न्यंभोजं, निशायां विकसति कुमुदं, चन्द्रिका शुक्लपक्षे मेघध्वानेषु नृत्यं भवति च शिखिनां,नाप्यशोके फलं स्यात्। न स्याज्जाती वसन्ते, न च कुसुमफले गन्धसारद्रुमाणा-मित्याद्युन्नेयमन्यत्कविसमयगतं सत्कवीनां प्रबन्धे ॥२५॥

एषामुदाहरणान्याकरेषु स्पष्टानि ।

धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः ।
आरूढत्वादिबोधाय

यथा

'पूरिते रोदसीध्वानैर्धनुर्ज्यास्फालनोद्भवैः ।'

अत्र ज्याशब्देनापि गतार्थत्वे धनु शब्देन ज्याया धनुष्याय त्तीकरणं बोध्यते । आदिशब्दात् 'भाति कर्णावतंसस्ते' अत्र कर्णस्थितत्वबोधनाय कर्णशब्द । एवं श्रवणकुण्डलशिरःशेखर-प्रभृतिः ।

एवं निरुपपदो मालाशब्दः पुष्पस्रजमेवाभिधत्ते इति स्थि-तावपि 'पुष्पमाला विभाति ते ।' अत्र पुष्पशब्द उत्कृष्टपुष्प-तद्बुध्यै । एवं मुक्ताहार इत्यत्र मुक्ताशब्देनान्यरत्नामिश्रितत्वम् ।

प्रयोक्तव्याः स्थिता अमी ॥ २६ ॥

धनुर्ज्यादयः सत्काव्यस्थिता एव निबद्धव्याः, न त्वस्थिता जघनकाञ्चीकरकङ्कणादयः ।

क्वचिन्न दोषो न गुणः

न्यूनपदत्वम् । यथा—

'तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।

तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्जातेति कोऽयं विधिः ॥'

अत्र प्रभावपिहितेति भवेदिति चेत्यनन्तरं नैनयत इति पदानि न्यूनानि। एषां पदानां न्यूनतायामप्येतद्वाक्यव्यंग्यस्य वितर्काख्यव्यभिचारिभावस्योत्कर्षाकरणान्न गुणः। दीर्घं न सेत्यादिवाक्यजन्यया च प्रतिपत्त्या तिष्ठेदित्यादिवाक्यप्रतिपत्तेर्बोधः स्फुटमेवावभासत इति न दोषः।

गुणः क्वाप्यधिकं परम् ॥ २७ ॥

यथा—

'आचरति दुर्जनो यत्सहसा मनसोऽप्यगोचरानर्थान्।
तन्न न जाने जाने स्पृशति मनः किंतु नैव निष्ठुरताम्॥'

अत्र न न जाने इत्यन्ययोगव्यवच्छेदाद्विच्छित्तिविशेषः।

समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित्।

यथा—'अन्यस्ता गुणरत्न—', इत्यादि।

अत्र प्रथमार्धेन वाक्यसमाप्तावपि द्वितीयार्धं वाक्यं पुनरुपात्तम्। एवं च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरात्तत्वं न वाक्यान्तरस्येति विज्ञेयम्।

गर्भितत्वं गुणः क्वापि

यथ—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात्प्रादुरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम्॥'

अत्र वदन्न एवेत्यादि वाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति ।

पतत्प्रकर्षता तथा ॥ ३० ॥

तथेति क्वचित् गुणः । यथा—'चञ्चद्भुज ' इत्यादौ ।

अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः ।

अनुकारे च सर्वेषां दोषाणां नैव दोषता ॥ ३१ ॥

सर्वेषां दुःश्रवत्वप्रभृतीनाम् । यथा—

'एष दुश्च्यवनं नौमीत्यादि जल्पति कश्चन ।',

अत्र दुश्च्यवनशब्दोऽप्रयुक्तः ।

अन्येषामपि दोषाणामित्यौचित्यान्मनीषिभिः ।

अदोषता च गुणता ज्ञेया चानुभयात्मता ॥३२॥

अनुभयता अदोषगुणता ॥

इति साहित्यदर्पणे दोषनिरूपणो नाम सप्तमः परिच्छेदः ।

अष्टमः परिच्छेदः ।

गुणानाह—

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा ।

गुणाः

यथा खल्वङ्गित्वमाप्तस्यात्मनः उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः, तथा काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि स्वसमर्पकपदसंदर्भस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः । यथा चैषां रसमात्रस्य धर्मत्वं तथा दर्शितमेव ।

माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा ॥ १ ॥

ते गुणाः । तत्र—

चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।

यत्तु केनचिदुक्तम्—'माधुर्यं द्रुतिकारणम्' इति, तन्न । द्रवीभावस्यास्वादस्वरूपाह्लादाभिन्नत्वेन कार्यत्वाभावात् । द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मककाठिन्यमन्युक्रोधादिकृतदीप्तत्वविस्मयहासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् ।

तच्च—

संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥ २ ॥

संभोगादिशब्दा उपलक्षणानि । तेन संभोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया ।

मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना ।

रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ॥ ३ ॥

अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।

यथा

'लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलय-
न्समालिङ्गन्नंगं परमशमसंगं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलय-
न्रजोवृन्दं विन्दन्किरति मकरन्दं दिशि दिशि ॥'

ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ॥ ४ ॥
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।

अस्यौजसः । अत्रापि वीरादिशब्दा उपलक्षणानि तेन वीराभासादावप्यस्यावस्थितिः ।

वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ॥ ५ ॥
उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह ।
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ॥ ६ ॥
तथा समासो बहुलो घटनौद्धत्यशालिनी ।

यथा—'चञ्चद्भुज-' इत्यादि ।

चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ॥ ७ ॥
स प्रसादः समस्तेषु रसेषु रचनासु च ।

व्याप्नोति आविष्करोति ।

शब्दास्तद्व्यंजका अर्थबोधकाः श्रुतिमात्रतः ॥ ८ ॥

यथा—

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम्

एषां शब्दगुणत्वं च गुणवृत्त्योच्यते बुधैः ।

'शरीरस्य शौर्यादिगुणयोग इव' इति शेषः ।

श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः ॥ ९ ॥

गुणाश्चिरंतनैरुक्ता ओजस्यन्तर्भवन्ति ते ।

ओजसि भक्त्या ओजःशब्दवाच्ये शब्दार्थधर्मविशेषे । तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा । यथा—

'उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकंदरोदरभुवः कुर्वन्प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायप्रेङ्खदसंख्यशङ्खधवला वेलेयमुद्गच्छति ॥'

अयं बन्धवैकट्यात्मकत्वादोज एव । समाधिरारोहावरोहक्रमः । आरोह उत्कर्षः, अवरोहोऽपकर्षः तयोः क्रमो वैरस्यतानावहो विन्यासः । यथा—'चञ्चद्भुज—' इत्यादि । अत्र पादत्रये क्रमेण बन्धस्य गाढता । चतुर्थपादे त्वपकर्षः । तस्यापि च तीव्रप्रयत्नोच्चार्यतया ओजस्विता । उदारता विकटत्वलक्षणा । विकटत्वं पदानां नृत्यत्प्रायत्वम् । यथा—

'सुचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झणिति रणितमासीत्तत्र चित्रं कलं च ।'

अत्र च तन्मतानुसारेण रसानुसंधानमन्तरेण शब्दप्रौढोक्तिमात्रेणौजः । प्रसाद ओजोमिश्रितशैथिल्यात्मा । यथा—'यो यः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनाम्' इति ।

माधुर्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ॥ १० ॥

पृथक्पदत्वं माधुर्यं तेनैवाङ्गीकृतं पुनः ।

अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ॥ ११ ॥

अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ।

स्पष्टमुदाहरणम् ।

ग्राम्यदुःश्रवतात्यागात्कान्तिश्च सुकुमारता ॥ १२ ॥

अङ्गीकृतेति सम्बन्धः । कान्तिरौज्ज्वल्यम् । तच्च हालिकादिपदविन्यासवैपरीत्येन लौकिकशोभाशालित्वम् । सुकुमारता अपारुष्यम् । अनयोरुदाहरणे स्पष्टे ।

क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।

अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ॥ १३ ॥

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य संदर्भस्य तेनैव परिनिष्ठानं मार्गाभेदः । स च क्वचिद्दोषः । तथाहि—

'अव्यूढाङ्गमरूढपाणिजठराभोगं च बिभ्रद्वपुः
पारीन्द्रः शिशुरेष पाणिपुटके समातु किं तावता ।
उद्यद्दुर्धरगन्धसिन्धुरशतप्रोद्दामदानार्णव-
स्रोतःशोषणरोषणात्पुनरितः कल्पाग्निरल्पायते ॥'

अत्रोद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव । अनेवंविधस्थाने माधुर्यादावेवान्तःपातः । यथा—'लताकुञ्जं गुञ्जत्—' इत्यादि ।

ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।

तदभावस्य दोषत्वात्स्वीकृता अर्थगा गुणाः ॥ १४ ॥

ओजः साभिप्रायत्वरूपम् । प्रसादोऽर्थवैमल्यम् । माधुर्यमुक्तिवैचित्र्यम् । सौकुमार्यमपारुष्यम् । उदारता अग्राम्यत्वम् । एषां पञ्चानामप्यर्थगुणानां यथाक्रममपुष्टार्थाधिकपदानवीकृतामंगलरूपाश्लीलग्राम्याणां निराकरणेनैवांगीकारः । स्पष्टान्युदाहरणानि ।

अर्थव्यक्तिः स्वभावोक्त्यालंकारेण तथा पुनः ।

रसध्वनिगुणीभूतव्यंग्यानां कान्तिनामकः ॥ १५ ॥

अंगीकृत इति सम्बन्धः । अर्थव्यक्तिर्वस्तुस्वभावस्फुटत्वम् । कान्तिर्दीप्तरसत्वम् । स्पष्टे उदाहरणे ।

श्लेषो विचित्रतामात्रमदोषः समता परम् ।

श्लेषः क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा । तत्र क्रमः क्रियासंततिः, विदग्धचेष्टितं कौटिल्यम्, अप्रसिद्धवर्णनाविरहोऽनुल्बणत्वम्, उपपादकयुक्तिविन्यास उपपत्तिः, एषां योगः संमेलनं स एव रूपं यस्या घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम् । अनन्यसाधारणरसोपकारित्वातिशयविरहादिति भावः ।

समता च प्रक्रान्तप्रकृतिप्रत्ययाविपर्यासेनार्थस्य विसंवादिताविच्छेदः । स च प्रक्रमभंगरूपविरह एव । स्पष्टमुदाहरणम् ।

न गुणत्वं समाधेश्च

समाधिश्चायोन्यन्यच्छायायोनिरूपद्विविधार्थदृष्टिरूपः । तत्रायोनिरर्थो यथा—

'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि नारंगकम् ।'

अन्यच्छायायोनिर्यथा—

'निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी ॥'

अत्र नीलोत्पलनयनयोरतिप्रसिद्धं सादृश्यं विच्छित्तिविशेषेण निबद्धम्। अस्य चासाधारणशोभानाधायकत्वान्न गुणत्वम्, किंतु काव्यशरीरमात्रनिर्वर्तकत्वम्।

क्वचित् 'चन्द्रम्' इत्येकस्मिन्पदार्थे वक्तव्ये 'अत्रेर्नयनसमुत्थं ज्योतिः' इति वाक्यवचनम्। क्वचित् 'निदाघशीतलहिमकालोष्णसुकुमारशरीरावयवा योषित्' इति वाक्यार्थे वक्तव्ये 'वरवर्णिनी' इति पदाभिधानम्। क्वचिदेकस्य वाक्यार्थस्य किंचिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः क्वचिद्बहुवाक्यप्रतिपाद्यस्यैकवाक्येनाभिधानमित्येवरूपः समासश्च। इत्येवमादीनामन्यैरुक्तानां न गुणत्वमुचितम्, अपि तु वैचित्र्यमात्रावहत्वम्।

तेन नार्थगुणाः पृथक् ॥ १६ ॥

तेनोक्तप्रकारेण। अर्थगुणा ओजःप्रभृतयः प्रोक्ताः॥

इति साहित्यदर्पणे गुणविवेचनो नामाष्टमः परिच्छेदः।

नवमः परिच्छेदः

अथोद्देशक्रमप्राप्तमलंकारनिरूपणं बहुवक्तव्यत्वेनोल्लंघ्य रीतिमाह—

पदसंघटना रीतिरङ्गसंस्थाविशेषवत् ।

उपकर्त्री रसादीनां

रसादीनामर्थाच्छब्दार्थशरीरस्य काव्यस्यात्मभूतानाम् ।

सा पुनः स्याच्चतुर्विधा ॥ १ ॥

वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।

सा रीतिः । तत्र—

माधुर्यव्यञ्जकैर्वर्णैं रचना ललितात्मिका ॥ २ ॥

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ।

यथा—लताकुंजं गुञ्जन्-इत्यादि ।

रुद्रटस्त्वाह—

'असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥'

अत्र दशगुणास्तन्मतोक्ताः श्लेषादयः ।

ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥ ३ ॥

समासबहुला गौडी

यथा—'चंचद्भुज-' इत्यादि ।

पुरुषोत्तमस्त्वाह—

'बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्राससमहिमपरतन्त्रा स्तोकवाक्या च ॥'

वर्णैः शेषैः पुनर्द्वयोः ।

समस्तपञ्चषपदो बन्धः पांचालिका मता ॥ ४ ॥

द्वयोर्वैदर्भीगौड्योः ।

यथा—

'मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।

मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥'

भोजस्त्वाह—

'समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।

मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥'

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता ।

यथा—

'अयमुदयति मुद्राभञ्जनः पद्मिनीना-

मुदयगिरिवनालीबालमन्दारपुष्पम् ।

विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्द-

न्कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥'

कश्चिदाह—

'मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।

उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥'

अन्ये त्वाहुः—

'गौडी डम्बरबद्धा स्याद्वैदर्भी ललितक्रमा ।

पांचाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥'

क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ॥ ५ ॥

वक्त्रादीत्यादिशब्दाद्वाच्यप्रबन्धौ । रचनादीत्यादिशब्दाद्वृत्तिवर्णौ ।

तत्र वक्त्रौचित्याद्यथा—

'मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥'

अत्र वाच्यक्रोधाद्यभिव्यञ्जकत्वेऽपि भीमसेनवक्तृत्वेनोद्धता रचनादयः । वाच्यौचित्याद्यथोदाहृते 'मूर्धव्याधूयमानः–' इत्यादौ । प्रबन्धौचित्याद्यथा नाटकादौ रौद्रेऽप्यभिनयप्रतिकूलत्वेन न दीर्घसमासादयः । एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः । कथायां रौद्रेऽपि नात्यन्तमुद्धताः । एवमन्यदपि ज्ञेयम् ।

इति साहित्यदर्पणे रीतिविवेचनो नाम नवमः परिच्छेदः ।

दशमः परिच्छेदः

अथावसरप्राप्तानलंकारानाह—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलंकारास्तेऽङ्गदादिवत् ॥ १ ॥

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः । अलंकारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः । शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वाच्छब्दालंकारेषु वक्तव्येषु शब्दार्थालंकारस्यापि पुनरुक्तवदाभासस्य चिरंतनैः शब्दालंकारमध्ये लक्षितत्वात्प्रथमं तमेवाह—

आपाततो यदर्थस्य पौनरुक्त्येन भासनम् ।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥ २ ॥

उदाहरणम्—

> 'भुजङ्गकुण्डली व्यक्तशशिशुभ्रांशुशीतगुः ।
> जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः ॥'

अत्र भुजङ्गकुण्डल्यादिशब्दानामापातमात्रेण सर्पाद्यर्थतया पौनरुक्त्यप्रतिभासनम् । पर्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्याद्यन्यार्थत्वम् । 'पायादव्यात्' इत्यत्र क्रियागतोऽयमलंकारः, 'पायात्' इत्यस्य 'अपायात्' इत्यत्र पर्यवसानात् । 'भुजङ्गकुण्डली' इति शब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम् । 'हरः शिवः' इति द्वितीयस्यैव । 'शशिशुभ्रांशु' इति द्वयोरपि । 'भाति सदानत्यागः' इति न द्वयोरपि । इति शब्दपरिवृत्तिसहत्वासहत्वाभ्यामस्योभयालंकारत्वम् ।

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।

स्वरमात्रसादृश्यं तु वैचित्र्याभावान्न गणितम्। रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः।

छेको व्यञ्जनसंघस्य सकृत्साम्यमनेकधा ॥ ३ ॥

छेकश्छेकानुप्रासः। अनेकधेति स्वरूपतः क्रमतश्च। रसः सर इत्यादेः क्रमभेदेन सादृश्यं नास्यालंकारस्य विषय। उदाहरणं मम तातपादानाम्—

आदाय बकुलगन्धानन्धीकुर्वन्पदे पदे भ्रमरान्।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ॥'

अत्र गन्धानन्धीति संयुक्तयोः, कावेरीवारीत्यसंयुक्तयोः, पावनः पवन इति व्यंजनानां बहूनां सकृदावृत्तिः छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः।

अनेकस्यैकधासाम्यमसकृद्वाप्यनेकधा।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥ ४ ॥

एकधा स्वरूपत एव, न तु क्रमतोऽपि। अनेकधा स्वरूपतः क्रमतश्च। सकृदपीत्यपिशब्दादसकृदपि। उदाहरणम्—

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूतांकुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षण-
प्राप्त प्राणसमासमागमरसोल्लासैरमी वासराः ॥

उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥ ५ ॥

उदाहरणम्

जीयाद शेष जगती जय बद्ध लक्ष्यः ।

एष च सहृदयानामतीव श्रुतिसुखावहत्वात् इत्यनुप्रासः ।

व्यञ्जनं चेद्यथावस्थं सहाद्य न स्वरेण तु ।

आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥६॥

यथावस्थमिति यथासंभवमनुस्वार विसर्गस्वरयुक्ताक्षरविशिष्टम् । एष च प्रायेण पादस्य पदस्य चान्तेप्रयोज्यः । पादान्तगो यथा मम—

'केशः काशस्तवकविकासः कायः प्रकटितकरभविलासः ।

चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥'

पदान्तगो यथा—

'मन्दं हसन्तः पुलकं वहन्तः' इत्यादि ।

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः ।

लाटानुप्रास इत्युक्तो

राजीवमिवराजीवं चन्द्रश्चन्द्र इवाजनि

जलं जलमिवानीलं शरत्समुदयोद्यमे

अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्मिरूपस्य भिन्नार्थत्वाल्लाटानुप्रासत्वमेव ।

'नयने तस्यैव नयने च ।'

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्यमात्रेण भिन्नार्थः ।

पथ्ये सतिगदार्तस्य किमौषधनिषेवणैः

पथ्येऽसति गदार्तस्य किमौषधनिषेवणैः ।

अनुप्रासः पञ्चधा ततः ॥ ७ ॥

स्पष्टम् ।

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ ८ ॥

अत्र द्वयोरपि पदयोः क्वचित्सार्थकत्वं क्वचिन्निरर्थकत्वम् । क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम् । अत उक्तम्—'सत्यर्थे' इति । 'तेनैव क्रमेण' दमो मोद इत्यादेर्विविक्तविषयत्वं सूचितम् । एतच्च पादपदार्धश्लोकावृत्तित्वेन पादाद्यावृत्तेश्चानेकविधतया प्रभूततमभेदम् । दिङ्मात्रमुदाह्रियते—

'नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम् ।
मृदुल-तान्त-लतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः ॥'

अत्र पदावृत्तिः 'पलाशपलाश' इति । 'सुरभिं सुरभिं' इत्यत्र च द्वयोः सार्थकत्वम् । 'लतान्तलतान्त' इत्यत्र प्रथमस्य निरर्थकत्वम् । 'परागपराग' इत्यत्र द्वितीयस्य । एवमन्यदप्युदाहार्यम् ।

'यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा ।'

इत्युक्तनयात् 'शरदिव विततान विशुद्धतां नवलतामरसामलसागरा' इत्यत्र न यमकत्वहानिः ।

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥ ९ ॥

द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमेणोदाहरणम्—

'के यूयं स्थल एव संप्रति वयं प्रश्नो विशेषाश्रयः

किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृङ्मनो वर्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥'

अत्र विशेषपदस्य 'विः पक्षी' 'शेषो नागः' इत्यर्थद्वययोगात्सभङ्गश्लेषः । अन्यत्र त्वभङ्गः ।

कृतकृत्वेऽपि जगतो न कर्ताऽस्यास्तिकश्चन ।
काकैर्वंवादिना प्रोक्तो जितमित्याहसौगतः ॥

शब्दैरेकविधैरेव भाषासु विविधास्वपि ।
वाक्यं यत्र भवेत्सोऽयं भाषासम इतीष्यते ॥१०॥

यथा मम—

'मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे ।
विरसासि केलिकीरे किमालि धीरे च गन्धसारसमीरे ॥'

एष श्लोकः संस्कृतप्राकृतसौरसेनीप्राच्यावन्तीनागरापभ्रंशेष्वेकविध एव ।

'सरसं कइण कव्व'

इत्यादौ तु 'सरसं' इत्यत्र संस्कृतप्राकृतयोः साम्येऽपि वाक्यगतत्वाभावे वैचित्र्याभावान्नायमलंकारः ।

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।
वर्णप्रत्ययलिंगानां प्रकृत्योः पदयोरपि ॥ ११ ॥
श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः ।

क्रमेणोदाहरणम्—

'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।

अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥'

अत्र 'विधौ' इतिविधु-विधि-शब्दयोरुकारेकारयोरौकाररूपत्वा च्छ्लेषः।

'किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः।

गङ्गातीरोपविष्टानां सर्व एव सुधाकिरः॥

अत्र 'सुधाकिरः' इति क्विप्क-प्रत्यययोः। किंचात्र बहुवचनैकवचनयोरैकरूप्याद्वचन श्लेषोऽपि।

प्रभोःश्रवण संज्ञाने तस्य चानुत्तमादया

तवदत्ता सदामोदं सर्वकल्मषहरिणी।

अत्र नपुंसकस्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि।

'अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।

सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः॥

अत्र 'वक्ष्यति' इति वहिवच्योः, 'सामर्थ्यकृत्' इति कृन्तति-करोत्योः प्रकृत्योः।

'पृथुकार्तस्वरपात्रं-इत्यादि। अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात्पदश्लेषो, नतु प्रकृतिश्लेषः। एवं च—

'सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।

नयोपकारसांमुख्यमायासि तनुवर्तनम्॥

अत्र 'हर, इति पक्षे शिवसंबोधनमिति सुप्। पक्षे हृधातोस्तिङिति विभक्तेः। एवं "भव" इत्यादौ। अस्य च भेदस्य [प्रत्ययश्लेषेणापि गतार्थत्वे] प्रत्ययान्तरासाध्यसुबन्ततिङन्तगतत्वेन विच्छित्तिविशेषाश्रयणात्पृथगुक्तिः।

'महदे सुरसंधं मे तमव समासङ्गमागमाहरणे।

हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥

अत्र संस्कृतमहाराष्ट्र्योः ।

पुनस्त्रिधा सभंगोऽथाभंगस्तदुभयात्मकः ॥ १२ ॥

एतद्भेदत्रयं चोक्तभेदाष्टके यथासम्भवं ज्ञेयम् ।

यथा वा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजंगहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

अत्र 'येन' इत्यादौ सभङ्गश्लेषः । 'अन्धक—' इत्यादावभङ्गः । अनयोश्चैकत्र संभवात्सभङ्गाभङ्गात्मको ग्रन्थगौरव भयात्पृथङ् नोदाहृतः ।

पुनस्त्रिधा —प्रकृतानेकविषयः । येनध्वस्तेत्यादिः अप्रकृतानेकविषयः । भीता नामाकुली भाव मित्यादि प्रकृताप्रकृतानेक विषयः—

अमदवुदयमारूढ इत्यादि सर्वस्वं हरेत्यादिश्च

अत्र केचिदाहुः—'सभङ्गश्लेष एव शब्दश्लेषविषयः । यत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः । अभङ्गस्त्वर्थश्लेष एव । यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेषः । योहि यदाश्रितः स तदलंकार एव । अलंकार्यालंकरणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिः' इति । तदन्ये न क्षमन्ते ।

तथाहि—अत्र ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियम इति। न च 'अन्धकारजय-'इत्यादौ शब्दाभेदः, 'अथभेदेन शब्दभेदः, इति दर्शनात्। किं चात्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभयोट्टंकनाच्छब्दालंकारत्वमेव। विसदृशशब्दद्वयस्य बंधे चैवंविधस्य वैचित्र्याभावाद् वैचित्र्यस्यैव चालंकारत्वात्। अर्थमुखप्रेक्षितया चार्थालंकारत्वेऽनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालंकारत्वप्रसंगः शब्दस्याभिन्नप्रयत्नोच्चार्यत्वेनार्थालंकारत्वे 'प्रतिकूलतामुपगते हि विधौ' इत्यादौ शब्दभेदेऽप्यर्थालंकारत्व तत्रापि प्रसज्यतीत्युभयत्रापि शब्दालंकारत्वमेव। यत्र तु शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना, तत्र—

'स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥'

इत्यादावर्थश्लेषः। अस्य चालंकारान्तरविविक्तविषयताया असंभवाद्विद्यमानेष्वलंकारान्तरेष्वपवादत्वेन तद्बाधकतया तत्प्रतिभोत्पत्तिहेतुत्वमिति केचित्।

इत्थमत्र विचार्यते—समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य गन्धोऽपि। 'विद्वन्मानसहंस—'इत्यादौ श्लेषगर्भे रूपकेऽपि मानसशब्दस्य चित्तसरोरूपोभयार्थत्वेऽपि रूपकेण श्लेषो बाध्यते। सरोरूपस्यैवार्थस्य विश्रान्तिधामतया प्राधान्यात् श्लेषे ह्यर्थद्वयस्यापि समकक्षत्वम्। 'संनिहितबालान्धकारा भास्वन्मूर्तिश्च' इत्यादौ विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेषः। एवं पुनरुक्तवदाभासेऽपि।

तेन 'येन ध्वस्त—,इत्यादौ प्राकरणिकयोः, 'नीतानाम्—, इत्यादावप्राकरणिकयोरेकधर्माभिसंबन्धात्तुल्ययोगितायाम्,

'स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम्।
मोहात्समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः ॥,

इत्यादौ च प्राकरणिकाप्राकरणिकयोरेकधर्माभिसंबंधाद्दीपके,

'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव।,

इत्यादौ चोपमायां विद्यमानायामपि श्लेषस्यैतद्विषयपरिहारेणासंभवाद् एषां च श्लेषविषयपरिहारेणापि स्थितेरेतद्विषये श्लेषस्य प्राधान्येन चमत्कारित्वप्रतीतेश्च श्लेषेणैव व्यपदेशो भवितुं युक्तः। अन्यथा तद्व्यपदेशस्य सर्वथा भावप्रसङ्गाच्चेति।

अत्रोच्यते—न तावत्परमार्थतः श्लेषस्यालंकारान्तराविविक्तविषयता 'येन ध्वस्त—, इत्यादिना विविक्तविषयत्वात्। न चात्र तुल्ययोगिता, तस्याश्च द्वयोरप्यर्थयोर्वाच्यत्वनियमाभावात्। अत्र च माधवोमाधवयोरेकस्य वाच्यत्वनियमे परस्य व्यंग्यत्वं स्यात्।

किं च तुल्ययोगितायामप्येकस्यैव धर्मस्यानेकधर्मिसंबन्धितया प्रतीतिः। इह त्वनेकेषां धर्मिणां पृथक्पृथग्धर्मसंबन्धतया। 'सकलकलम्—, इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः। पूर्णोपमाया निर्विषयत्वापत्तेः। 'कमलमिव मुखं मनोज्ञमेतत्, इत्याद्यस्ति पूर्णोपमाविषय इति चेत्, न यदि 'सकल—,इत्यादौ शब्दश्लेषतया नोपमा, तत्किमपराद्धं 'मनोज्ञम्, इत्यादावर्थश्लेषेण।

'स्फुटमर्थालंकारावेतावुपमासमुच्चयौ, किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥,

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वं तु । ननु गुणक्रियासाम्यस्यैवोपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात् । शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्यावास्तवत्वात । ततश्च पूर्णोपमाया अन्यथानुपपत्त्या गुणक्रियासाम्यस्यैवार्थश्लेषविषयतया परित्यागे पूर्णोपमाविषयतायुक्ता, नतु 'सकल—, इत्यादौ शब्दसाम्यस्यैवेति चेत्, न । 'साधर्म्यमुपमा, इत्येवाविशिष्टस्योपमालक्षणस्य शब्दसाम्याद्व्यावृत्तेरभावात् । यदि च शब्दसाम्ये साधर्म्यमवास्तवत्वान्नोपमाप्रयोजकम्, तदा कथं 'विद्वन्मानस—, इत्यादावाधारभूते चित्तादौ सरोवराद्यारोपो राजादेर्हंसाद्यारोपप्रयोजकः ।

किंच यदि वास्तवसाम्य एवोपमांगीकार्या, कथं त्वयापि 'सकलकल—, इत्यादौ वाच्यभूतोपमांगी क्रियते । किं चात्र श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकता । श्लेषबन्धतः प्रथमं साम्यस्य संभवात् । इत्युपमाया एवाङ्गित्वेन व्यपदेशो ज्यायान् 'प्रधानेन हि व्यपदेशा भवन्ति न्यायात् ।

ननु शब्दालंकारविषयेऽङ्गांगिभावसंकरो नांगीक्रियते तत्कथमत्र श्लेषोपमयोरंगांगिभावः संकर इति चेत्, न अर्थानुसंधानविरहिण्यनुप्रासादावेव तथानंगीकारात् । एवं दण्पकादावपि ज्ञेयम् ।

'सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥,

अत्र शरद्वर्णनया प्रकरणेन धार्तराष्ट्रादि शब्दानां हसाद्य-र्थाभिधाने नियमनाद् दुर्योधनादिरूपोऽर्थः शब्दशक्तिमूल वस्तु-ध्वनिः । इह च प्रकृतप्रबन्धाभिधेयस्य द्वितीयार्थस्य सूच्यत-यैव विवक्षितत्वादुपमानोपमेयभावो न विवक्षित इति नोपमा-ध्वनिर्नवा श्लेष इति सर्वमवदातम् ।

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।

आदिशब्दात्खड्ग मुरज चक्र गोमूत्रिकादयः । अस्य च त-था विधलिपिसंनिवेशविशेषवशेन चमत्कारविधायिनामपि व-र्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन चमत्कारविधा-यिभिवर्णैरभेदेनोपचाराच्छब्दालंकारत्वम् ।

रसस्य परिपन्थित्वान्नालंकारः प्रहेलिका ॥ १३ ॥

उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका ।

'पाण्डवानां सभामध्ये दुर्योधन उपागतः ।
तस्मै गां च सुवर्णं च सर्वाण्याभरणानि च ॥,

अत्र 'दुर्योधनः, इतयत्र 'अदुर्योऽधनः, इति । 'ऊदुः, इति क्रियागुप्तिः । एवमन्यत्रापि ।

अथावसरप्राप्तेष्वर्थालंकारेषु प्राधान्यात्सादृश्यमूलेषु ल-क्षितव्येषु तेषामप्युपजीव्यत्वेन प्रथममुपमामाह—

साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ॥१४॥

रूपकादिषु साम्यस्य व्यङ्ग्यत्वम्, व्यतिरेके च वैधर्म्य-स्याप्युक्तिः, उपमेयोपमायां वाक्यद्वयम्, अनन्वये त्वेकस्यैव साम्योक्तिरित्यस्या भेदः ।

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यम्

सा उपमा । साधारणधर्मो द्वयोः सादृश्यहेतू गुणक्रिये मनोज्ञ आदि । औपम्यवाचकमिवादि । उपमेयं मुखादि । उपमानं चन्द्रादि ।

इयं पुनः ॥ १५ ॥

श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा
वतिः ॥ १६ ॥

यथेववादयः शब्दा उपमानान्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसंबन्धं बोधयन्तीति तत्सद्भावे श्रौत्युपमा । एवं 'तत्र तस्येव' इत्यनेनेवार्थे विहितस्य वतेरुपादाने । तुल्यादयस्तु 'कमलेन तुल्यं मुखम्' इत्यादावुपमेय एव । 'कमलं मुखं च तुल्यम्' इत्यादावुभयत्रापि विश्राम्यन्तीत्यर्थानुसंधानादेव साम्यं प्रतिपादयन्तीति तत्सद्भावे आर्थी । एवं 'तेनतुल्यं'-इत्यादिना तुल्यार्थे विहितस्य वतेरुपादाने ।

द्वे तद्धिते समासेऽथ वाक्ये

द्वे श्रौती आर्थी च । उदाहरणम्

'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा राजन् ॥

अत्र क्रमेण त्रिविधा श्रौती ।

'मधुरं मृगावदुदितं पल्लवतुल्यं सुपेलवं चेतः ।
चन्द्रकरेण च सदृशं चारु चरित्रं विराजते सुधियः ।
अत्र क्रमेण त्रिविधा आर्थी

पूर्णा षडेव तत् ।

स्पष्टम् ।

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः ॥१७॥
त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत् ।

सा लुप्ता । तत्र्भेदमाह—

पूर्णावद्धर्मलोपे सा विना श्रौतीं तु तद्धिते ॥१८॥

सा लुप्तोपमा धर्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्वोक्तरीत्या षट्प्रकारा, किं त्वत्र तद्धिते श्रौत्या असंभवात्पञ्चप्रकारा । उदाहरणम्—

'मुखमिन्दुर्यथा, पाणिः पल्लवेन समः सखे ।
वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो, मनोऽश्मवत् ॥'

आधारकर्मविहिते द्विविधे च क्यचि, क्यङि ।
कर्मकर्त्रोर्णमुलि च, स्यादेवं पञ्चधा पुनः ॥१९॥

'धर्मलोपे लुप्ता' इत्यनुषज्यते । क्यच्-क्यङ्-णमुलः कलापमते पिप्रागमः । क्रमेणोदाहरणम्—

'अन्तःपुरीयसि रणेषु, सुतीयसि त्वं
पौरं जनं, तव सदा रमणीयते श्रीः ।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
संचारमत्रभुवि संचरसि क्षितीश ॥'

अत्र 'अन्तःपुरीयसि' इत्यत्र सुखविहारास्पदत्वस्य, 'सुतीयसि' इत्यत्र स्नेहनिर्भरत्वस्य च साधारणधर्मस्य च लोपः। एवमन्यत्र।

इह च यथादितुल्यादिविरहाच्छ्रौत्यादिविशेषचिन्ता नास्ति। इदं च केचिदौपम्यप्रतिपादकस्येवादेर्लोपे उदाहरन्ति, तदयुक्तम्। क्यङादेरपि तदर्थविहितत्वेनौपम्यप्रतिपादकत्वात्। ननु क्यङादिषु सम्यगौपम्यप्रतीतिर्नास्ति, प्रत्ययेनास्वतन्त्रत्वात् इवादिप्रयोगाद्यभावाच्च, इति न वाच्यम्। कल्पबादावपि तथाप्रसङ्गात्। न च कल्पबादीनामिवादितुल्यतयौपम्यस्य वाचकत्वम्, क्यङादीनां तु द्योतकत्वम्। इवादीनामपि वाचकत्वे निश्चयाभावात्। वाचकत्वे वा 'समुदितं पदं वाचकम्' 'प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ' इति च मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यच्च केचिदाहुः—'वत्यादय इवाद्यर्थेऽनुशिष्यन्ते, क्यङादयस्त्वाचारार्थे' इति, तदपि न। न खलु क्यङादय आचारमात्रार्थाः, अपि तु सादृश्याचारार्था इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।

उपमानानुपादाने द्विधा वाक्यसमासयोः।

उदाहरणम्—

'तस्याननेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्।'

अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोगस्यमानत्वादुपमानलोपः। अत्रैव च "मुखेन सदृशं" इत्यत्र 'मुखं यथेदं', 'नयनतुल्यं' इत्यत्र 'दृगिव' इति पाठे श्रौत्यपि संभवतीति। अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम्।

आपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥२०॥

क्रमेणोदाहरणम्—

'यशस्तव क्षमापाल सुधाकरमनोहरम्'

'गर्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः ।'

अत्र 'गर्दभति' इत्यत्रौपम्यवाचिनः क्विपो लोपः । न चेहोपमेयस्यापि लोपः । 'निनदन्' इत्यनेनैव निर्देशात् ।

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ।

'तस्यामनेन' इत्यादौ 'रम्यं' इति स्थाने 'लोके' इति पाठेऽनयोरुदाहरणम् ।

क्विप्समासगता द्विधा धर्मवादिविलोपने ॥२१॥

उदाहरणम्—

विधवति मुखाब्जमेतत्'

अत्र 'विधवति' इति मनोहरत्व क्विप्प्रत्यययोर्लोपः । केचित्त्वत्रापि प्रत्ययलोपमाहुः । 'मुखाब्ज' इति च समासगा ।

उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि ।

यथा—

'अरातिविक्रमालोकविकस्वरविलोचनः ।

कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥'

अत्र सहस्रायुधमिवात्मानमाचरति' इति वाक्ये उपमेयस्यात्मनो लोपः । न चेहौपम्यवाचकलोप उपादेय न्यायात् । अत्र केचिदाहुः— 'सहस्रायुधेन सह वतत इति ससहस्रायुधः स इवाचरतीतिवाक्यात्ससहस्रायुधीयतीति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोपः' इति, तन्न विचारसहम् । ककारि क्यचोऽनुशासनविरुद्धत्वात् ।

धर्मोपमेयलोपेऽन्या

यथा—

'यशसि प्रसरति भवतः क्षीरोदीयन्ति सागराः सर्वे।'

अत्र क्षीरोदमिवात्मानमाचरन्तीत्युपमेय आत्मा साधारणधर्मः शुक्लता च लुप्तौ।

त्रिलोपे च समासगा ॥ २२ ॥

यथा—

'राजते सिंहविक्रमः।'

अत्र सिंहस्य विक्रम इव विक्रमो यस्या इति समासे उपमाप्रतिपादकसाधारणधर्मोपमानोनां लोपः।

तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः।

पूर्णा षड्विधा लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा। एषु चोपमाभेदेषु षड्गेऽलुप्तसाधारणधर्मेषु भेदेषु विशेषः प्रतिपाद्यते—

एकरूपः क्वचित्क्वापि भिन्नः साधारणो गुणः॥२३॥

भिन्ने बिम्बानुबिम्बत्वं शब्दमात्रेण वा भिदा।

एकरूपे यथा उदाहृतम्—'मधुरं सुधावदधरम्—' इत्यादि।'

बिम्बप्रतिबिम्बत्वे यथा—

'भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव॥'

अत्र 'श्मश्रुलैः' इत्यस्य 'सरघाव्याप्तैः' इति दृष्टान्तवत्प्रतिबिम्बनम्।

शब्दमात्रेण भिन्नत्वे यथा—

'स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सः ।
कथयामास सखा मे मनोगतं निखिलमाकूतम् ॥'

अत्रैके एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्देन निर्दिष्टे ।

एकदेशविवर्तिन्युपमा वाच्यत्वगम्यते ॥ २४ ॥
भवेतां यत्र साम्यस्य

यथा—

'नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः ।
पदे पदे विभान्ति स्म मरालैरसनैरिव ॥'

पद्मोत्पलादीनां नेत्रादीनां सादृश्यं वाच्यं सरःश्रीणां वा-ङ्गनासाम्यं गम्यम् ।

कथिता रशनोपमा ।
यथोर्ध्वमुपमेयस्य यदि स्यादुपमानता ॥ २५ ॥

यथा—

'चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः ॥'

मालोपमा यदेकस्योपमानं बहु दृश्यते ।

यथा—

'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥'

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते—

'हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा ।
विमलाः कुमुदानीव तारकाः शरदागमे ॥'

'अस्य राज्ञो गृहे भान्ति भूपानां ता विभूतयः।
पुरन्दरस्य भवने कल्पवृक्षभवा इव ॥'

अत्रोपमेयभूतविभूतिभिः 'कल्पवृक्षभवा इव' इत्युपमानभूता विभूतय आक्षिप्यन्त इत्याक्षेपोपमा। अत्रैव 'गृहे' इत्यस्य 'भवने' इत्यनेन प्रतिनिर्देशात्प्रतिनिर्देश्योपमा इत्यादयश्च न लक्षिताः। एवंविधवैचित्र्यस्य सहस्रधा दर्शनात्।

उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ॥ २६ ॥

अर्थादेकवाक्ये।

यथा—

'राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे ॥'

अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमानोपमेयभावो वैकल्पिकः। 'राजीवमिव पाथोजम्' इति चास्य लाटानुप्रासाद्विविक्तो विषयः। किं त्वत्रोचितत्वादेकशब्दप्रयोग एव श्रेयान्। तदुक्तम्।

'अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम्।
अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम् ॥' इति।

पर्यायेण द्वयोरेतदुपमेयोपमा मता।

एतदुपमानोपमेयत्वम्। अर्थाद्वाक्यद्वये।

यथा—

'कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥'

अत्रास्य राज्ञः श्रीबुद्ध्यादिसदृशं नान्यदस्तीत्यभिप्रायः।

सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ॥२७॥

यथा—

'अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम् ॥'

'मयि सकपटं-' इत्यादौ च स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलङ्कारः । राघवानन्दमहापात्रास्तु वैसादृश्यात्स्मृतिमपि स्मरणालंकारमिच्छन्ति । तत्रोदाहरणं तेषामेव यथा—

'शिरीषमृद्वी गिरिषु प्रपेदे यदा यदा दुःखशतानि सीता ।
तदा तदास्याः सदनेषु सौख्यलक्षाणि दध्यौ गलदस्रु रामः ॥'

रूपकं रूपितारोपाद्वि (पो वि) षये निरपह्नवे ।

'रूपित-' इति परिणामाद् व्यवच्छेदः । एतच्च तत्प्रस्तावे विवेचयिष्यामः । 'निरपह्नवे' इत्यपह्नुतिव्यवच्छेदार्थम् ।

तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥२८॥

तद्रूपकम् ।

तत्र

यत्र कस्यचिदारोपः परारोपणकारणम् ।
तत्परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ॥२९॥
प्रत्येकं केवलं मालारूपं चेति चतुर्विधम् ।

तत्र श्लिष्टशब्दनिबन्धनं केवलपरम्परितं यथा—

'आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे ॥'

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बमित्यारोपो राजबाहो राहुत्वारोपे निमित्तम् । मालारूपं यथा—

'पद्मोदयदिनाधीशः सदागतिसमीरणः।
भूभृदावलिदम्भोलिरेक एव भवान्भुवि॥'

अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनम्, भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्यत्वारोपनिमित्तम्।

अश्लिष्टशब्दनिबन्धनं केवलं यथा—

'पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः॥'

अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम्।

मालारूपं यथा—

'नभोनरेन्द्रस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः।
विराजते व्योमसरः सरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्॥'

अत्र मनोजादे राजत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम्। तत्र च राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलादीनां चन्द्रमण्डलत्वाद्यारोपो निमित्तम्' इति केचित्।

अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥३०॥
समस्तवस्तुविषयमेकदेशविवर्ति च।

तत्र

आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम्॥३१॥

प्रथमं समस्तवस्तुविषयम्। यथा—

'रावणावग्रहक्लान्तमिति वागमृतेन सः।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे॥'

अत्र कृष्णस्य मेघत्वारोपे वागादीनाममृतत्वादिकमारोपितम्।

यत्र कस्याचिदार्थत्वमेकदेशविवर्ति तत् ।

कस्यचिदाराप्यमाणस्य । यथा—

'लावण्यमधुभिः पूर्णमास्यमस्य विकस्वरम् ।
लोकलोचनरोलम्बकदम्बैः केन दीयते ॥'

अत्र लावण्यादौ मधुत्वारोपः शाब्दः, मुखस्य पद्मत्वाद्यारोप आर्थः । न चेयमेकदेशविवर्तिन्युपमा विकस्वरत्वधर्मस्यारोप्यमाणे पद्मे मुख्यतया वर्तमानान्मुखे चोपचरितत्वात् ।

निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ॥३२ ॥

मालाकेवलरूपत्वात् ।

तत्र मालारूपं निरङ्गं यथा रसगंगाधरे—

' धर्मस्यात्मा भागधेयं क्षमायाः
सारः सृष्टेर्जीवितं शारदायाः ।
आत्मा साक्षाद् ब्रह्मणो वेदमूर्ते
राकल्पान्तं राजतामेष राजा ॥

केवलं यथा—

बुद्धिर्दीपकला लोके यया सर्वम्प्रकाशते,
अबुद्धिस्तामसी रात्रिर्यया किंचिन्न भासते ॥

तेनाष्टौ रूपके भिदाः ।

'चिरंतनैरुक्ताः' इति शेषः। क्वचित्परम्परितमप्येकदेशविवर्ति यथा—

'खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य।'

अत्रार्थः क्ष्मायां महिषीत्वारोपः खड्गे सौविदल्लत्वारोपे निमित्तम् । अस्य भेदस्य पूर्ववन्मालारोपत्वेऽप्युदाहरणं मृग्यम्

दृश्यन्ते क्वचिदारोप्याः श्लिष्टाः साङ्गेऽपि रूपके ॥३३॥

तत्रैकदेशविवर्ति श्लिष्टं यथा—

अलौकिक-महालोक-प्रकाशितजगत्त्रयः गीयसे देव सद्वंशरत्नं त्वं जगदापणे जनवाणीभिरिति पाठे समरतवस्तुविषयम् ।

क्वचित्समासाभावेपि रूपकं दृश्यते—

'मुखं तव कुरङ्गाक्षि सरोजमिति नान्यथा ।'

क्वचिद्वैयधिकरण्येऽपि यथा—

'सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुण—

ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।

यैरेषापि दुराशया कलियुगे राजावली सेविता

तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥'

इदं मम । अत्र केषांचिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपकविशेषत्वादर्थालंकारमध्ये गणनम् । एवं वक्ष्यमाणालंकारेषु बोध्यम् ।

अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् ।

तदेवाधिकारूढवैशिष्ट्यरूपकम् । यथा मम—

'इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।
इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥'

अत्र कलङ्कराहित्यादिनाधिकं वैशिष्ट्यम् ।

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ॥ ३४ ॥

परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा ।

आरोप्यमाणस्यारोपविषयात्मतया परिणमनात्परिणामः ।

सामानाधिकरण्ये यथा—

अपारे संसारे विषमविषयारण्यसरणौ ।
मुधा भ्रामं भ्रामं विगलितविरामं जडमतेः ।
परिश्रान्तस्यायं तरणितनयातीरनिलयः ।
समन्तात्सन्तापं हरिनवतमालस्तिरयतु ।

वैयधिकरण्ये यथा—

विनम्रशालिप्रसवौघशालिनीरपेतपंकाःससरोरुहाम्भसः
ननन्द पश्यन्नुपसीमसस्थलीरुपायनीभूतशरद्गुणश्रियः ॥

अत्र शरद उपायनत्वं तोषहेतुः तच्च व्यधिकरणम् । रूपके मुखचन्द्रादावारोप्यमाणचंद्रादिरुपरञ्जकतामात्रम्, न तु प्रकृते तोषणादावुपयोगः । इह तूपायनादेर्विषयेण तादात्म्यं प्रकृते च नायकतोषणादावुपयोगः । अतएव रूपके आरोप्यस्यावच्छेद-

कत्त्व मात्रेणान्वयः । अत्र तु तादात्म्येन । 'रावणावग्रहक्लान्तं, इत्यादौ रूपकमेव, न तु परिणामः । आरोप्यमाणवर्षणस्य त- द्रूपेणाप्रस्तुतत्वात् । न खलु तत्कस्यचिदपि प्रस्तुतकार्य्यस्य घटनार्थमनुसंधीयते । अन्यथापिकथनसम्भवात् वर्षणस्यापिरूप- काङ्गभूतत्वाच्च अयमपि रूपकवदधिकारूढवैशिष्ट्यो दृश्यते ।

यथा—

व्यापिनानिष्कलंकेन यशश्चन्द्रेण भूभृतः
शुक्लीकृतादिशः सर्वास्तोषितम्भुवनत्रयम् ।

सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः ॥३४॥

शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा ।

यत्र संशय एव पर्यवसानं स शुद्धः । यथा—

किमेष पृथ्वीगत उष्णभानुरुतोर्ध्वगामी ज्वलितः कृशानुः
उताचलः प्रज्वलितोग्रसानुरित्येव रामे विशयः परेषाम् ।

यत्रादावन्ते च संशय एव मध्ये निश्चयः स निश्चयमध्यः ।

यथा—

'अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति पुनः
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥'

अत्र मध्ये मार्तण्डाद्यभावनिश्चयो राजनिश्चये द्वितीयसंश- योत्थानासंभवात् ।

यत्रादौ संशयोऽन्ते च निश्चयः स निश्चयान्तः । यथा —

अहो वानरमूर्त्तिर्वेत्येष मे भयसंशयः

नेत्रोन्मेषनिमेषाभ्यान्तेनैवाशु विनाशितः ।
साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान्प्रतिभोत्थितः ॥ ३६ ॥

यथा—

'मुग्धा दुग्धधिया गवां विदधते कुम्भानधो बल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥'

अस्वरसोत्थापिता भ्रान्तिर्नायमलंकारः । यथा—'शुक्तिकायां रजतम्' इति । न चासादृश्यमूला । यथा—

'संगमविरहविकल्पे वरमिह विरहो न संगमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥'

क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥ ३७ ॥

क्रमेणोदाहरणम्—

'प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ॥'

अत्रैकस्यापि भगवतस्तत्तद्गुणयोगादनेकधोल्लेखे गोपवधूप्रभृतीनां रुच्यादयो यथायोगं प्रयोजकाः । यदाहुः—

'यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसंधानसाधितः ॥'

अत्र भगवतः प्रियत्वादीनां वास्तवत्वाद्ग्रहीतृभेदाच्च न मालारूपकम्, न च भ्रान्तिमान्, न चायमभेदे भेद इत्येवंरूपातिशयोक्तिः । तथा हि 'अन्यदेवाङ्गलावण्यम्—' इत्यादौ लावण्या-

देर्विनयस्य पृथक्त्वेनाध्यवसानम्, न चेह भगवति गोपवधूप्रभृतिभिः प्रियत्वाध्यवसीयते। प्रियत्वादेर्भगवति न कालेऽताश्विकत्वात्। केचिदाहुः— अयमलङ्कारो नियमेनालंकारान्तरविच्छित्तिमूलः। उक्तोदाहरणे च शिशुत्वादीनां नियमाभिप्रायाद्विषयभेदानां भिन्नत्वाध्यवसाय इत्यतिशयोक्तिरस्ति। तत्सद्भावेऽपि प्रत्येतृभेदेन नानात्वप्रतीतिरूपो विच्छित्तिविशेष उल्लेखभिन्नालंकारप्रयोजकः। श्रीकण्ठजनपदवर्णने—'वज्रपञ्जरमिति शरणागतैः, अम्बरविवरमिति वातिकैः' इत्यादिश्चातिशयोक्तेर्विविक्तो विषयः इह च रूपकालंकारयोगः। वस्तुतस्तु— 'अम्बरविवरं' इत्यादौ भ्रान्तिमत्त्वमेवेच्छति न रूपकम्, भेदप्रतीतिपुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात्। यदाहुः शारीरकमीमांसाभाष्यव्याख्याने श्रीवाचस्पतिमिश्राः— 'अपि च परशब्दः परत्रलक्ष्यमाणगुणयोगेन वर्तते इति। यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः' इति। इह तु वातिकानां श्रीकण्ठजनपदवर्णने भ्रान्तिकृत एवाम्बरविवराद्यारोप इति। अत्रैव च 'तपोवनमिति मुनिभिः कामायतनमिति वेश्याभिः' इत्यादौ परिणामालंकारयोगः।

'गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः'

इत्यादौ चानेकधोल्लेखे गाम्भीर्यादिविषयभेदः प्रयोजकः। अत्र च रूपकयोगः। 'गुरुर्वचसि पृथुरुरसि, अर्जुनो यशसि—' इत्यादिषु चास्य रूपकाद्विविक्तो विषय इति अत्र हि श्लेषमूलातिशयोक्तियोगः।

प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः।

इयं द्विधा । कचिदपह्नवपूर्वक आरोपः, क्वचिदारोपपूर्वको-ऽपह्नव इति । क्रमेणोदाहरणम्—

'नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः ॥'

अयम्पयोधिर्न नभो विशालम्फेनावलीयं न तु तारकाली
अयम्फणीन्द्रो नहि रात्रिकान्तःसुप्तो मुरारिः न कलंकलेखा ॥

एवम् । 'विराजतिव्योमवपुःपयोधिस्तारामयास्तत्र च फेनभङ्गाः' इत्याकारेण च प्रकृतनिषेधो बोध्यः ।

गोपनीयं कमप्यर्थं द्योतयित्वा कथंचन ॥ ३८ ॥
यदि श्लेषेणान्यथा वान्यथयेत्सान्यपह्नुतिः ।

श्लेषेण यथा—

'काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले नहि नहि सखि पिच्छलः पन्थाः ॥'

अत्र 'अपतितया' इत्यत्र पतिं विनेत्युक्त्वा पश्चात्पतना-भावेनान्यथा कृतम् । यथा—

अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः ॥ ३९ ॥
निश्चयाख्योऽयमलंकारः । अन्यदित्यारोप्यमाणम् ।

'वदनमिदं न सरोजं नयने नेन्दीवरे एते ।
इह सविधे मुग्धदृशो भ्रमर मुधा किं परिभ्रमसि ॥'

नन्वयं निश्चयान्तः संदेहः, तत्र संशयनिश्चययोरेकाश्र-

यत्वेनानवस्थानात् । अत्र तु भ्रमरसंशयो नायकादेर्निश्चयः । किं च न भ्रमरादेरपि संशयः । एककोट्यनधिके ज्ञाने तथा समीपगमनासंभवात् । तर्हि भ्रान्तिमानस्तु । अस्तु नाम भ्रमरादेर्भ्रान्तिः । न चेह तस्याश्चमत्कारविधायित्वम् । अपि तु तथाविधनायकायुक्तेरेवेति सहृदयसंवेद्यम् । किंचाविवक्षितेऽपि भ्रमरादेः पतनादौ , भ्रान्तौ वा नायिकाचाटूक्त्यादिरूपेणैव संभवति तथाविधोक्तिः । न च रूपकध्वनिरयम् , मुखस्य कमलत्वेनानिर्धारणात् । न चापह्नुतिः , प्रस्तुतस्यानिषेधात् । इति पृथगेवायमलंकारश्चिरंतनोक्तालंकारेभ्यः । शुक्तिकायां रजतधिया पतति पुरुषे शुक्तिकेयं न रजतमिति कस्यचिदुक्तिर्नायमलंकारो वैचित्र्याभावात् ।

भवेत्संभावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥ ४० ॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ।
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि ॥ ४१ ॥
तदष्टधापि प्रत्येकं भावाभावाभिमानतः ।
गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः ॥ ४२ ॥
द्वात्रिंशद्विधतां यान्ति

तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रं यथा—

'तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्ट हिमगिरिभुजायमाना भगवती भागीरथी ।

अत्र भुजत्वजातिरुत्प्रेक्ष्यते

'ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः

गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥

अत्र सप्रसवत्वं गुणः ॥

अपशंकमंकपरिवर्तनोचिताश्चलिताः पुरः पतिमुपेतुमात्मजाः
अनुरोदितीव करुणेन पत्रिणां विरुतेन वत्सलतयैषनिम्नगाः ।

एष ऐरावतः । माघः ।

कलिन्दशैलादियमाप्रयागं केनापि दीर्घा परिखा निखाता ।
मन्ये तलस्पर्शविहीनमस्यामाकाशमानीलमिदं विभर्ति ॥

एते भावाभिमाने । अभावाभिमाने यथा—

बाहुजानां समस्तानां स्वभाव इव मूर्तिमान्
जयत्प्रतिबलो लोके जामदग्न्यः प्रतापवान् ॥ जात्यभावः ।

प्रतीयमानोत्प्रेक्षा यथा—प्रातस्तीव्रदिवाकरातपभिया शीतांशुरस्तंगतः । अत्र भियेवेत्युत्प्रेक्षा एवमन्यत् ।

ननु ध्वनिनिरूपणप्रस्तावेऽलंकाराणां सर्वेषामपि व्यङ्ग्यत्वं भवतीत्युक्तम् । संप्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्रतीयमानत्वम् । उच्यते—व्यङ्ग्योत्प्रेक्षायां 'महिलासहस्स—' इत्यादावुत्प्रेक्षणं विनापि वाक्यविश्रान्तिः । इह तु शीतांशोर्भियः असंभवाद्भियेवेत्युत्प्रेक्षयैवेति व्यङ्ग्यप्रतीयमानोत्प्रेक्षयोर्भेदः । अत्र वाच्योत्प्रेक्षायाः षोडशसु भेदेषु मध्ये विशेषमाह—

तत्र वाच्याभिदा पुनः
विनाद्रव्यं त्रिधा सर्वाः स्वरूपफलहेतुगाः ॥ ४३ ॥

तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षायाः षोडश भेदास्तेषु च जात्यादीनां त्रयाणां ये द्वादश भेदास्तेषां प्रत्येकं स्वरूपफलहेतुगम्यत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः । द्रव्यस्य स्वरूपोत्प्रेक्षणमेव संभवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः । अत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु 'स्मरस्य विजयस्तम्भः- इति । 'सप्रसवा इव- इत्याद्या जातिगुणस्वरूपगाः । फलोत्प्रेक्षा यथा—

'रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्' ॥

अत्राख्यातुमिति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम् । हेतूत्प्रेक्षा यथा—

'सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥'

अत्र दुःखरूपो गुणो हेतुत्वेनोत्प्रेक्षितः । एवमन्यत् ।

उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः ।

तेषु चत्वारिंशत्संख्याकेषु भेदेषु मध्ये ये स्वरूपगायाः षोडशभेदास्ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः। तत्र निमित्तस्योपादानं यथा पूर्वोदाहृते अनुरोदितीव 'इत्युत्प्रेक्षायां निमित्तं पतिगृहगमनमुपात्तम् । अनुपादाने यथा-'चन्द्र इवापरः' इत्यत्र तथाविधसौन्दर्याद्यतिशयो नोपात्तः । हेतुफलयोस्तु नियमेन नि-

मित्तस्योपादानमेव। तथाहि—'विश्लेषदुःखादिव' इत्यत्र यन्निमित्तं बद्धमौनत्वम् 'आख्यातुमिव' इत्यत्र च भूप्रवेशस्तयोरनुपादानेऽसंगतमेव वाक्यं स्यात्। प्रतीयमानायाः षोडशसु भेदेषु विशेषमाह—

प्रतीयमाना भेदाश्च प्रत्येकं फलहेतुगाः ॥ ४४ ॥

यथोदाहृते 'प्रातरित्यादौ' इत्यत्र भियेवेति हेतुरुत्प्रेक्षितः। अस्यामपि निमित्तस्यानुपादानं न संभवति। इवाद्यनुपादाने निमित्तस्य चाकीर्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात्। स्वरूपोत्प्रेक्षाप्यत्र न भवति। धर्मान्तरतादात्म्यनिबन्धनायामस्यामिवाद्यप्रयोगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात्। यथा—'अयं राजापरः पाकशासनः' इति। तदेवं द्वात्रिंशत्प्रकारा प्रतीयमानोत्प्रेक्षा।

उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा।
घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदक्षोदैः।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्वनम् ॥,

अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयव्याप्तत्वं नोपात्तम्। यथा वा—

'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।'

अत्र तमसो लेपनस्य व्यापनरूपो विषयो नोपात्तः। अञ्जनवर्षणस्य तमःसंपातः। अनयोरुत्प्रेक्षानिमित्तं च तमसोऽतिब-

हुतत्वं धारारूपेणाधः संयोगश्च यथासंख्यम् । केचित्तु—'अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनं च निमित्तम्, एवं नभोऽपि वर्षणक्रियाकर्तृत्वेन' इत्याहुः ।

अलंकारान्तरोत्था सा वैचित्र्यमधिकं भजेत् ॥ ४५ ॥

तत्र सापह्नवोत्प्रेक्षा यथा मम—

'अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गं विगलति लावण्यवारिपूर इव ॥'

श्लेषहेतुगा यथा—

'मुक्तोत्करः संकटशुक्तिमध्याद्विनिर्गतः, सारसलोचनायाः ।
जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद्गुणवत्त्वमाप ॥'

अत्र गुणवत्त्वे श्लेषः। कम्बुग्रीवाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः । अत्र 'जानीमहे' इत्युत्प्रेक्षावाचकम् । एवम्—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादय.।

क्वचिदुपमोपक्रमोत्प्रेक्षा यथा—

'पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ।
वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ॥'

इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा । पर्यवसाने तु जलधितीरे शैवालस्थितेः संभावनानुपपत्तेः संभावनोत्थानमित्युत्प्रेक्षा । भ्रान्तिमदलंकारे 'मुग्धा दुग्धधिया—' इत्यादौ भ्रान्तानां बल्लवादीनां विषयस्य चन्द्रिकादेर्ज्ञानमेव नास्ति । तदुपनिबन्धनस्य कविनैव कृतत्वात् । इह तु संभावनाकर्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः । संदेहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः । इह तूत्कटा संभाव्यभूतैका कोटिः । अतिशयोक्तौ विषयिणः प्रतीतस्य पर्यवसानेऽसत्यता प्रतीयते । इह तु प्रतीतिकाल एवेति भेदः ।

'रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥'

इत्यत्र धर्मविशेषो तिमिराकान्तता रञ्जनादिरूपेण संदिह्यत इति संदेहालंकार इति केचिदाहुः, तन्न । एकविषये समानबलतयानेककोटिस्फुरणस्यैव संदेहत्वात् । इह तु तर्वादिव्याप्तेः प्रतिसंबन्धिभेदो व्यापनादेर्निगरणेन रञ्जनादेः स्फुरणं च । अन्ये तु—'अनेकत्वनिर्धारणरूपविच्छित्याश्रयत्वेनैककोट्यधिकेऽपि भिन्नोऽयं संदेहप्रकारः' इति वदन्ति स्म, तदप्ययुक्तम् । निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हि संभावना । तस्याश्चात्र स्फुटतया सद्भावान्नुशब्देन चेवशब्दवत्तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता । अलमदृष्टसंदेहप्रकारकल्पनया ।

'यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते
　　तदाचष्टे लोकः शशक इति नो मां प्रति तथा ।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
　　कटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम् ॥'

इत्यत्र मन्येशब्दप्रयोगेऽप्युक्तरूपाया संभावनाया अप्रतीतेर्वितर्कमात्रं नासावपह्नुत्प्रेक्षा ।

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ॥४६॥

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः । अस्य चोत्प्रेक्षायां विषयिणोऽनिश्चितत्वेन निर्देशात्साध्यत्वम् । इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वम् । विषयनिगरणं चोत्प्रेक्षायां विषयस्याधःकरणमात्रेण । इहापि मुखं द्वितीयश्चन्द्र इत्यादौ । यदाहुः—

'विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः ।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते ॥' इति ।

भेदेऽप्यभेदः संबन्धेऽसंबन्धस्तद्विपर्ययौ ।
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः ॥४७॥

तद्विपर्ययौ अभेदे भेदः, असंबन्धे संबन्धः । सातिशयोक्तिः । अत्र भेदेऽभेदो यथा मम—

नयनानन्दसन्दोहतुन्दिलीकरणक्षमा
तिरयत्वाशु सन्तापं काऽपि कादम्बिनी मम (कृष्णमूर्तिः)
घनश्यामदेहयष्टेः कादम्बिन्याऽत्र भेदेनाध्यवसायः ।

यथा वा—'विश्लेषदुःखादिव बद्धमौनम्' । अत्र चेतनगतमौनित्वमन्यदचेतनगतं चान्यदिति द्वयोर्भेदेऽप्यभेदः ।

अभेदेभेदो यथा—

अन्या जगद्धितमयी वचसः प्रवृत्ति—
रन्यैव काऽपि रचना वचनावलीनाम्,
लोकोत्तरा च कृतिराकृतिरार्तहृद्या,
विद्यावतां सकलमेव गिरान्दवीयः ।

संबन्धेऽसंबन्धो यथा—

पीयूषयूषकल्पामल्पामपि ते गिरन्ति पीतवताम्
तोषाय कल्पते नो तोयजमकरन्दमधुरिमोद्रेकः ।
तोषसम्बन्धे ऽप्यसम्बन्धः ।

असंबन्धे संबन्धो यथा—

'यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् ।
तदोपमीयते तस्य वदनं चारुलोचनम् ॥'

अत्र यद्यर्थबलादाहृतेन सम्बन्धेन संभावनया संबन्धः । कार्यकारणयोः पौर्वापर्यविपर्ययश्च द्विधा भवति । कारणात्प्रथमं कार्यस्य भावे, द्वयोः समकालत्वे न च । क्रमेण यथा—

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः
निमित्तनैमित्तिकयोरयं क्रमः तव प्रसादस्य पुरस्तु सम्पदः

'सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यं मण्डलं च महीक्षिताम् ॥'

इह केचिदाहुः—'घनश्यामदेहगतो लौकिकोऽतिशयोऽलौकिकत्वेनाध्यवसीयते । घनश्यामदेहादीनां कादम्बिन्यादिभिरध्यवसाये 'अन्यदेवाङ्गलावण्यम्—' इत्यादिप्रकारेष्वव्याप्तिलक्षणस्य' इति, तन्न । तत्रापि ह्यन्यदङ्गलावण्यमन्यत्वेनाध्यवसीयते । तथाहि 'अन्यदेव' इति स्थाने 'अन्यदिव' इति पाठेऽध्यवसायस्यासाध्यत्वमेवेत्युत्प्रेक्षाङ्गीक्रियते । 'प्रागेव हरिणाक्षीणाम्—' इत्यत्र बकुलादिश्रीणां प्रथमभावितापि पश्चाद्भावित्वेनाध्यवसिता । अत एवात्रापीवशब्दप्रयोगे उत्प्रेक्षा । एवमन्यत्र ।

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसंबन्धः स्यात्तदा तुल्ययोगिता ॥४८॥

अन्येषामप्रस्तुतानां धर्मो गुणक्रियारूपः । उदाहरणम्—

'तद्वाणीमार्दवं श्रोतुः कस्य चित्ते न भासते ।
मालतीशशभृल्लेखाकदलीनां कठोरता ॥'

इत्यत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुणसंबन्धः।'

एवम्—

'दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः।
परोपकरणं कायादसारात्सारमाहरेत् ॥'

अत्र दानादीनां कर्मभूतानां सारतारूपैकगुणसंबन्ध एकाहरणक्रियासंबन्धः।

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥४९॥

क्रमेणोदाहरणम्—

'बलावलेपादधुनापि पूर्ववत्-
प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित्प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥'

अत्र प्रस्तुताया निश्चलायाः प्रकृतत्वे अप्रस्तुतायाश्च सत्या योषित एकानुगमनक्रियासंबन्धः।

प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः।
एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक् ॥५०॥

यथा—

'धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥'

अत्र समाकर्षणमुत्तरलीकरणं च क्रियैकैव पौनरुक्त्यनिरासाय भिन्नवाचकतया निर्दिष्टा। इदं मालयापि दृश्यते। यथा—

'विमल एव रविर्विशदः शशी

प्रकृतिशोभन एव हि दर्पणः ।
शिवगिरिः शिवहाससहोदरः
सहजसुन्दर एव हि सज्जनः ॥'

अत्र विमलविशदादेरर्थत एक एव। वैधर्म्येण यथा—

उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वम्भर विश्वमीशिषे ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ।

भा० १-३८

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।

सधर्मस्येति प्रतिवस्तूपमाव्यवच्छेदः। अयमपि साधर्म्यवैधर्म्याभ्यां द्विधा । उदाहरणम्—

'अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥'

गाम्भिर्गुणोपरुषात्क्षराभिस्तिरस्कृतायामिन नरा महत्त्वम् ।
अलब्धशाणोत्कषणानृपाणां न जातु मौलौ मणयो वसन्ति ॥

जनयन्ति परां प्रीतिं नराः सत्कुलसम्भवाः ।
नहि कारस्करः क्वापि तापनिर्वापणक्षमः ॥

'वसन्तलेखैकनिबद्धभावं परासु कान्तासु मनः कुतो नः ।
प्रफुल्लमल्लीमधुलम्पटः किं मधुव्रतः काङ्क्षति वल्लिमन्याम् ॥'

इदं पद्यं मम । अत्र 'मनः कुतो नः' इत्यस्य 'काङ्क्षति वल्लिमन्याम्' इत्यस्य चैकरूपतयैव पर्यवसानात्प्रतिवस्तूपमैव । इह तु कर्णे मधुधारावमनस्य नेत्रहरणस्य च साम्यमेव, न त्वैकरूप्यम् । अत्र समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावोऽर्थान्तरन्यासः । प्रतिवस्तूपमादृष्टान्तयोस्तु न तथेति भेदः ।

संभवन्वस्तुसंबन्धोऽसंभवन्वापि कुत्रचित् ॥५१॥
यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ।

तत्र संभवद्वस्तुसंबन्धनिदर्शना यथा —

'कोऽत्र भूमिवलये जनान्मुधा तापयन्सुचिरमेति संपदम् ।
वेदयन्निति दिनेन भानुमानाससाद चरमाचलं ततः ॥'

अत्र रवेरीदृशार्थवेदनक्रियायां वक्तृत्वेनान्वयः संभवत्येव। ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपकर्मवत्त्वात् । स च रवेरस्ताचलगमनस्य परितापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति । असंभवद्वस्तुनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा । तत्रैकवाक्यगा यथा—

'प्रयाणे तव राजेन्द्र मुक्ता वैरिमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः ॥'

अत्र पादाभ्यामसंबद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयासंबन्धः कल्प्यते, स चासंभवन्राजहंसगतिमिव गतिं बोधयति । अनेकवाक्यगा यथा—

'इदं किलाव्याजमनोहरं वपुः तपःक्लमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥'

अत्र यत्तच्छब्दनिर्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपः क्लमत्वसाधनेच्छा नीलोत्पलपत्रधारया समिल्लताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्यवस्यति।

यथा वा—

'जन्मेदं वन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥'

अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्यवसानम् । एवम्—

'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥'

अत्र मन्मत्या सूर्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्यवसानम् ।

इयं च क्वचिदुपमेयवृत्तस्योपमानेऽसंभवेऽपि भवति । यथा—

महामहानीलशिलारुचः पुरो
निषेदिवान्कंसकृषः सविष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकै-
रचूचुरच्चन्द्रमसोऽभिरामताम् ।

मालारूपापि यथा मम—

'क्षिपसि शुकं वृषदंशकवदने मृगमर्पयसि मृगादनरदने ।
वितरसि तुरगं महिषविषाणे निदधच्चेतो भोगवितानें ॥'

इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्यवसानम् । दृष्टान्ते तु पर्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् । नापीयमर्थापत्तिः । तत्र 'हारोऽयं हरिणाक्षीणाम्' इत्यादौ सादृश्यपर्यवसनाभावात् ।

आधिक्यमुपमेयस्योपमानान्न्यूनताथवा ॥ ५२ ॥

व्यतिरेकः

स च

एक उक्तेऽनुक्ते हेतौ पुनस्त्रिधा ।
चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः ॥ ५३॥

आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा ।
प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः ॥ ५४ ॥

उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणमुपमानगतं निकर्षकारणं च । तयोर्द्वयोरप्युक्तावेकः प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधेऽप्यस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपिशब्दादश्लेषेऽपि चतुर्विंशतिप्रकारः । उपमानान्न्यूनतायामप्यनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वाष्टचत्वारिंशत्प्रकारो व्यतिरेकः ।

उदाहरणम्—

'अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा ।'

अत्रोपमेयगतमकलङ्कत्वमुपमानगतं च कलङ्कित्वं हेतुद्वयमप्युक्तम् । यथाशब्दप्रतिपादनाच्च शाब्दमौपम्यम् । अत्रैव 'न कलङ्कि विधूपमम्' इति पाठ आर्थम् । 'जयतीन्दुं कलङ्किनम्' इति पाठे त्विववत्तुल्यादिपदविरहादाक्षिप्तम् । अत्रैवाकलङ्कपदत्यागे उपमेयगतोत्कर्षकारणानुक्तिः । कलङ्किपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः । द्वयोरनुक्तौ द्वयोरनुक्तिः । श्लेषे यथा—

'अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणाः ॥'

अत्रेवार्थे वतिरिति शाब्दमौपम्यम् । उत्कर्षनिकर्षकारणयोर्द्वयोरप्युक्तिः । गुणशब्दः श्लिष्टः । अन्ये भेदाः पूर्ववदूह्याः । एतानि चोपमेयस्योपमानादाधिक्य उदाहरणानि । न्यूनत्वे दिङ्मात्रं यथा—

'क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥'

अत्रोपमेयभूतयौवनास्थैर्यस्याधिक्यम् । तेनात्र 'उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः' इति केषांचिल्लक्षणे 'विपर्यये वेतिपदमनर्थकम्' इति यत्केचिदाहुः, तन्न विचारसहम् । तथाहि—अत्राधिक्यन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते । अत्र च चन्द्रापेक्षया यौवनस्यासत्त्वं स्फुटमेव । अस्तु वात्रोदाहरणं यथा कथंचिद्गतिः ।

'हनुमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः ।'

इत्यादिषु का गतिरिति सुष्ठूक्तं 'न्यूनताथवा' इति ।

सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥५५॥

अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्यकारणपौर्वापर्यविपर्ययरूपा च । अभेदाध्यवसायमूलापि श्लेषभित्तिकान्यथा च । क्रमेणोदाहरणम्—

त्वयि कुपिते रिपुमण्डलखण्डनपाण्डित्यसम्पदुद्दण्डे
गिरिगहनेऽरिवधूनां दिवसैः सह लोचनानि वर्षन्ति ॥
भाग्येन सह रिपूणामुत्तिष्ठसि विष्टरात्क्षमाविष्टः ।
सहसैव पतितेषु क्षितिशासन मृत्युनासाकम् ।

'सममेव नराधिपेन सा गुरुसंमोहविलुप्तचेतना ।

अगमत्सह तैलबिन्दुना ननु दीपार्चिरिव क्षितेस्तलम्॥

इयं च मालयापि संभवति। यथोदाहृते भाग्येनसह रिपूणां इत्यादौ।

'लक्ष्मणेन समं रामः काननं गहनं ययौ।'

इत्यादौ चातिशयोक्तिमूलाभावान्नायमलंकारः।

विनोक्तिर्यद्विनाऽन्येन नासाध्वन्यदसाधु वा।

नासाधु अशोभनं न भवति। एवं च यद्यपि शोभनत्व एव पर्यवसानं तथाप्यशोभनत्वाभावमुखेन शोभनवचनस्यायमभिप्रायो यत्कस्यचिद्वर्णनीयस्याशोभनत्वं तत्परसंनिधेरेव दोषः। तस्य पुनः स्वभावतः शोभनत्वमेवेति।

यथा—

'विना जलदकालेन चन्द्रो निस्तन्द्रतां गतः।

विना ग्रीष्मोष्मणा मञ्जुवनराजिरजायत॥'

असाध्वशोभनं यथा—

'अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम्।

का दिनश्रीर्विनार्केण का निशा शशिना विना॥'

'निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।

उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन॥'

अत्र परस्परविनोक्तिभङ्ग्या चमत्कारातिशयः। विनाशब्दप्रयोगाभावेऽपि विनार्थविवक्षायां विनोक्तिरेवेयम्। एवं सहो-

क्तिरपि सहशब्दप्रयोगाभावेऽपि सहार्थविवक्षया भवतीति बोध्यम् ।

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ॥ ५६ ॥

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ।

अत्र समेन कार्येण प्रस्तुतेऽप्रस्तुतव्यवहारसमारोपः । यथा—

कलिंगराजस्ययशः पवित्रं पुनाति लोकत्रयमच्छरूपम् ।
हिमाचलं चुम्बति चारुकान्ति पयोधिमध्ये च दधाति पादम् ॥

अत्र यशसि नदीत्वमारोपितम् ।

लिङ्गसाम्येन यथा—

'असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥'

अत्र पुंस्त्रीलिङ्गमात्रेण रविसंध्ययोर्नायकनायिकाव्यवहारः ! विशेषणसाम्य तु श्लिष्टतया, साधारण्येन, औपम्यगर्भत्वेन च त्रिधा । तत्र श्लिष्टतया यथा—

उत्सगे तव गंगे पायं पायं पयोति मधुरतरम्
शमिताखिलपरितापः कथय कदाहं चिराय शयिताहे

गंगायां मात्रारोपः । साधारण्येन यथा—

'निसर्गसौरभोद्भ्रान्तभृङ्गसंगीतशालिनी ।
उदिते वासराधीशे स्मेराजनि सरोजिनी ॥'

अत्र निसर्गेत्यादिविशेषणसाम्यात्सरोजिन्या नायिकाव्य-

व्यवहारप्रतीतौ स्त्रीमात्रगामिनः स्मेरत्वधर्मस्य समारोपः कारणम् । तेन विना विशेषणसाम्यमार्गेण नायिकाव्यवहारप्रतीतेरसंभवात् । औपम्यगर्भत्वं पुनस्त्रिधा संभवति, उपमारूपकसंकरगर्भत्वात् । तत्रोपमागर्भत्वं यथा—

'दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥'

अत्र सुवेषत्ववशात्प्रथमं दन्तप्रभाः पुष्पाणीवेत्युपमागर्भत्वेन समासः । अनन्तरं च दन्तप्रभासदृशैः पुष्पैश्चितेत्यादिसमासान्तराश्रयेण समानविशेषणमाहात्म्याद्धरिणेक्षणायां लताव्यवहारप्रतीतिः । रूपकगर्भत्वे यथा—'लावण्यमधुभिः पूर्ण' इत्यादि । संकरगर्भत्वे यथा—'दन्तप्रभापुष्प—' इत्यादि । 'सुवेषा' इत्यत्र 'परीता' इति पाठे उपमारूपकसाधकाभावात्संकरसमाश्रयणम् । समासान्तरं पूर्ववत् । समासान्तरमहिम्ना लताप्रतीतिः । एषु च येषां मते उपमासंकरयोरेकदेशविवर्तिता नास्ति तन्मते आद्यतृतीययोः समासोक्तिः द्वितीयस्तु प्रकार एकदेशविवर्तिरूपकविषय एव । पर्यालोचने त्वाद्ये प्रकारे एकदेशविवर्तिन्युपमैवाङ्गीकर्तुमुचिता ।

रूपकेऽप्रकृतमात्मस्वरूपसंनिवेशेन प्रकृतस्य रूपमवच्छादयति । इह तु स्वावस्थासमारोपेणानवच्छादितस्वरूपमेव तं पूर्वावस्थातो विशेषयति । अत एवात्र व्यवहारसमारोपो न तु स्वरूपसमारोप इत्याहुः । उपमाध्वनौ श्लेषे च विशेष्यस्यापि साम्यम्. इह तु

विशेषणमात्रस्य। अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम्, इह त्वप्रस्तुतस्येति भेदः।

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ॥ ५७॥

यथा—

'अङ्गराज सेनापते द्रोणोपहासिन् कर्ण, रक्षैनं भीमाद्दुःशासनम्।'

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्।

'स्वभावादेकार्थैः' इति शब्दश्लेषाद् व्यवच्छेदः। 'वाचनं' इति च ध्वनेः। उदाहरणम्—

'प्रवर्तयन्क्रियाः साध्वीर्मालिन्यं हरितां हरन्।
महसा भूयसा दीप्तो विराजति विभाकरः ॥'

अत्र प्रकरणादिनियमाभावाद् द्वावपि राजसूर्यौ वाच्यौ।

क्वचिद्विशेषः सामान्यात्सामान्यं वा विशेषतः ॥ ५८॥
कार्यान्निमित्तं कार्यं च हेतोरथ समात्समम्।
अप्रस्तुतात्प्रस्तुतं चेद्गम्यते पञ्चधा ततः ॥ ५९ ॥
अप्रस्तुतप्रशंसा स्याद्

क्रमेणोदाहरणम्—

'पादाहतं यदुत्थाय मूर्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥'

अथास्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम्।

'स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया॥'

अत्रेश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः। एवं चात्राप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः। दृष्टान्ते प्रख्यातमेव वस्तु प्रतिबिम्बत्वेनोपादीयते। इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः।

'इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव॥'

अत्र संभाव्यमानेभ्य इन्द्वादिगताञ्जनलिप्तत्वादिभ्यः कार्येभ्यो वदनादिगतसौन्दर्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते।

हृतसारमिवेन्दुमण्डलं दमयन्ती वदनाय वेधसा।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनी खनीलिम॥
सौन्दर्यमप्रस्तुतम् द्योत्यते।

तुल्ये प्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च। श्लेषमूलापि समासोक्तिवद्विशेषणमात्रश्लेषे श्लेषवद्विशेष्यस्यापि श्लेषे भवतीति द्विधा। क्रमेण यथा—

'सहकारः सदामोदो वसन्तश्रीसमन्वितः।
समुज्ज्वलरुचिः श्रीमान्प्रभूतोत्कलिकाकुलः॥'

अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात्सहकारात्कस्यचित्प्रस्तुतस्य नायकस्य प्रतीतिः ।

'पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने न महानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक्प्रकटिता पुरुषोत्तमेन ॥'

अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रसिद्ध्या प्रथमं विष्णुरेव बोध्यते । तेन वर्णनीयः कश्चित्पुरुषः प्रतीयते ।

सादृश्यमात्रमूला यथा—

'एकः कपोतपोतः शतशः श्येनाः क्षुधाभिधावन्ति ।
अम्बरमावृतिशून्यं हरहर शरणं विधेः करुणा ॥'

अत्र कपोतादप्रस्तुतात्कश्चित्प्रस्तुतः प्रतीयते । इयं च क्वचिद्वैधर्म्येणापि भवति ।

'धन्याः खलु वने वाताः कह्लारस्पर्शशीतलाः ।
राममिन्दीवरश्यामं ये स्पृशन्त्यनिवारिताः ॥'

अत्र वाता धन्या अहमधन्य इति वैधर्म्येण प्रस्तुतः प्रतीयते । वाच्यस्य संभवासंभवोभयरूपतया त्रिप्रकारेयम् । तत्र संभवे उक्तोदाहरणान्येव ।

असंभवे यथा—

'कोकिलोऽहं भवान्काकः समानः कालिमावयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः ॥'

अत्र काककोकिलयोर्वाक्यं प्रस्तुताध्यारोपणं विना-संभवि। उभयरूपत्वे यथा—

'अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः।
कथं कमलनालस्य माभूवन् भङ्गुरा गुणाः॥'

अत्र प्रस्तुतस्य कस्यचिदध्यारोपणं विना कमलनालान्तश्छिद्राणां गुणभंगुरीकरणे हेतुत्वमसंभवि। अन्येषां तु संभवीत्युभयरूपत्वम्। अस्याश्च समासोक्तिवद् व्यवहारसमारोपप्राणत्वाच्छब्दशक्तिमूलत्वाद्वस्तुध्वनेर्भेदः। उपमाध्वनावप्रस्तुतस्य व्यङ्ग्यत्वम्। एवं समासोक्तौ श्लेषेऽपि द्वयोरपि वाच्यत्वम्।

उक्ता व्याजस्तुतिः पुनः।
निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः॥६०॥

निन्दया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः। स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः। क्रमेण यथा—

कस्ते शौर्यमदो योद्धं त्वय्येकं सप्तिमास्थिते।
सप्तसप्तिसमारूढा भवन्ति परिपन्थिनः॥

'व्याजस्तुतिस्तव पयोद मयोदितेयं
सञ्जीवनाय जगतस्तव जीवनानि।
स्तोत्रं तु ते महदिदं घन धर्मराज
साहाय्यमर्जयसि यत्पथिकान्निहत्य॥'

पर्यायोक्तं यदा भंग्या गम्यमेवाभिधीयते।

उदाहरणम्—

'स्पृष्टास्ता नन्दने शच्याः केशसंभोगलालिताः ।
सावज्ञं पारिजातस्य मञ्जर्यो यस्य सैनिकैः ॥'

अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्यं कारणं वैचित्र्यविशेषप्रतिपत्तये सैन्यस्य पारिजातमञ्जरीमावज्ञस्पर्शनरूपकार्यद्वारेणाभिहितम् । न चेदं कार्यात्कारणप्रतीतिरूपाप्रस्तुतप्रशंसा । तत्र कार्यस्याप्रस्तुतत्वात् । इह तु वर्णनीयस्य प्रभावातिशयबोधकत्वेन कार्यमपि कारणवत्प्रस्तुतम् । एवं च—

'अनेन पर्यासयताश्रुबिन्दून् मुक्ताफलस्थूलतमान्स्तनेषु ।
प्रत्यर्पिताः शत्रुविलासिनीनामाक्षेपसूत्रेण विनैव हाराः ॥'

अत्र वर्णनीयस्य राज्ञो गम्यभूतशत्रुमारणरूपकारणवत्कार्यभूतं तथाविधशत्रुस्त्रीक्रन्दनजलमपि प्रभावातिशयबोधकत्वेन वर्णनार्हमितिपर्यायोक्तमेव ।

'राजन्राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥'

अत्र प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैवारयः पलायिताइति कारणं प्रस्तुतम् । 'कार्यमपि वर्णनार्हत्वेन प्रस्तुतम्' इति केचित् ।

अन्ये तु —'राजशुकवृत्तान्तेन कोऽपि प्रस्तुतप्रमाता बोध्यत इत्यप्रस्तुतप्रशंसैव' इत्याहुः ।

सामान्यं वा विशेषेण विशेषस्तेन वा यदि ॥ ६१ ॥
कार्यं च कारणेनेदं कार्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥ ६२ ॥

क्रमेणोदाहरणम्—

'बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
संभूयाम्भोधिमभ्येति महानद्या नगापगा ॥'

अत्र द्वितीयार्धगतेन विशेषरूपेणार्थेन प्रथमार्धगतः सामान्योऽर्थः सोपपत्तिकः क्रियते ।

'यावदर्थपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥'

'पृथ्वि स्थिरा भव भुजङ्गम धारयैनां
त्वं कूर्मराज तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
देवः करोति हरकार्मुकमाततज्यम् ॥'

अत्र कारणभूतं हरकार्मुकाततज्यीकरणं पृथिवीस्थैर्यादेः कार्यस्य समर्थकम् ।

'सहसा विदधीत न क्रियां—' इत्यादौ संपत्करणं कार्यं सहसा विधानाभावस्य विमृश्यकारित्वारूपस्य कारणस्य समर्थकम्। एतानि साधर्म्य उदाहरणानि। वैधर्म्ये यथा—

'इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्।
शाम्येत्प्रत्यपकारेण नोपकारेण दुर्जनः॥'

अत्र सामान्यं विशेषस्य समर्थकम्। 'सहसा विदधीत—' इत्यत्र सहसा विधानाभावस्यापत्प्रदत्वं विरुद्ध कार्यं समर्थकम्। एवमन्यत्।

हेतोर्वाक्यपदार्थत्वे काव्यलिंगं निगद्यते।

तत्र वाक्यार्थता यथा—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गताः
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते॥'

अत्र चतुर्थपादे पादत्रयवाक्यानि हेतवः। पदार्थता यथा मम—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम्।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः॥'

अत्र द्वितीयार्धे प्रथमार्धमेकपदं हेतुः। अनेकपदं यथा मम—

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्।
देव त्रिपथगात्मानं गोपयत्युग्रमूर्धनि॥"

इह केचिद् वाक्यार्थगतेन काव्यलिङ्गेनैव गतार्थतया कार्यकारणभावेऽर्थान्तरन्यासं नाद्रियन्ते, तदयुक्तम् । तथाह्यत्र हेतुस्त्रिधा भवति—ज्ञापको निष्पादकः समर्थकश्चेति । तत्र ज्ञापकोऽनुमानस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य, इति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात् । तथाहि—'यत्त्वन्नेत्र-', इत्यादौ चतुर्थपादवाक्यम् । अन्यथा साकाङ्क्षतयासमञ्जसमेव स्यात् इति पादत्रयगतवाक्यं निष्पादकत्वेनापेक्षते । 'सहसा विदधीत', इत्यादौ तु

'परापकारनिरतैर्दुर्जनैः सह संगतिः ।
वदामि भवतस्तत्त्वं न विधेया कदाचन ॥'

इत्यादिवदुपदेशमात्रेणापि निराकाङ्क्षतया स्वतोऽपि गतार्थं सहसा विधानाभावं संपद्वरणं सोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात् ।

'न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ।
त्वद्वाजिराजिनिर्धूतधूलिभिः पङ्किला हि सा ॥'

इत्यत्र हिशब्दोपादानेन पङ्किलत्वादिति हेतुत्वस्य स्फुटतया नायमलंकारः । वैचित्र्यस्यैवालंकारत्वात् ।

अनुमानं तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ॥६३॥

यथा

समुत्पतद्भिर्विहगैर्निमीलद्भिश्च पंकजैः
विकसन्त्या च मालत्या गतोऽभिज्ञायते रविः ।

अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह ।

यथा मम—'तारुण्यस्य विलासः–' इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ता । विलासहासयोस्त्वध्यवसायमूलोऽयमलंकारः ।

अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत् ॥ ६४ ॥

यथा—

रविणा पीड्यमानेयं प्रभाते शशिनः कला
विरज्यति भृशं कोपात्तेन भूमा रवेः पुनः ।

वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये ।
निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥६५॥

तत्र वक्ष्यमाणविषये क्वचित्सर्वस्यापि सामान्यतः सूचितस्य निषेधः, क्वचिदंशोक्तावंशान्तरे निषेध इति द्वौ भेदौ । उक्तविषये च क्वचिद्वस्तुस्वरूपस्य निषेधः, क्वचिद्वस्तुकथनस्येति द्वौ । इत्याक्षेपस्य चत्वारो भेदाः ।

क्रमेण यथा—

रे खल तव खलुचरितं विदुषामग्रे विविच्य कथयामि
अलमथवा पापात्मन्कृतया कथयाऽपि ते हतया ।
श्वासोऽनुमानवेध्यः शीतान्यङ्गानि निश्चला दृष्टिः

तस्येयं-वा विरमतु निर्दय त्वयि जल्पितै रपि किम्।
न वयं कवयस्तव स्तवं नृप कुर्महि यन्मृषाक्षरम्
रणसीम्नि तवावलोकने तरुणार्को दिनकौशिकायते।
एवं दोषविचारणाकुलतया देव त्वयि प्रोन्मुखे
वक्तव्यप्रतिभादरिद्रमतयः किञ्चिन्नहि ब्रूमहे।
माम्पाहीति विधिर्निषेधविषयोवाच्यः स्वतन्त्रे कथम्
नोवेद्यो भवतास्मि दीनइति गीःश्लाघ्या न संख्यावताम्।

अनिष्टस्य तथार्थस्य विध्याभासः परो मतः।

तथेति पूर्ववद्विशेषप्रतिपत्तये। यथा—

'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥'

अत्रानिष्टत्वाद्गमनस्य विधिः प्रस्खलद्रूपो निषेधे पर्यवस्यति। विशेषश्च गमनस्यात्यन्तपरिहार्यत्वरूपः प्रतीयते।

विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते॥ ६६॥
उक्तानुक्तनिमित्तत्वाद्द्विधा सा परिकीर्तिता।

विनाकारणमुपनिबध्यमानोऽपि कार्योदयः किञ्चिदन्यत्कारणमपेक्ष्यैव भवितुं युक्तः। तच्च कारणान्तरं क्वचिदुक्तं क्वचिदनुक्तमिति द्विधा। यथा—

अपीतक्षीवकादम्बमसम्मृष्टामलाम्बरम्
अप्रसादितशुद्धाम्बु जगदासीन्मनोरमम्।
अकथितोहेतुः। जगदासीत् हिमागमइति कथितो हेतुः

सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा ॥ ६७॥

तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा—

'धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥'

अत्र महामहिमशालित्वं निमित्तमुक्तम् । अत्रैव चतुर्थपादे 'कियन्तः सन्ति भूतले' इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्वं चानुक्तनिमित्तस्यैव भेद इति पृथङ् नोक्तम् यथा—

'स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शंभुना न हृतं बलम् ॥'

अत्र तनुहरणेनापि बलाहरणे निमित्तमचिन्त्यम् । इह च कार्याभावः कार्यविरुद्धसद्भावमुखेनापि निबद्ध्यते । विभावनायामपि कारणाभावः कारणविरुद्धसद्भावमुखेन ।

**जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ॥६८॥
विरुद्धमेव भासेत विरोधोऽसौ दशाकृतिः ।**

दिङ्मात्रं यथा—

शयनानि शिलामृणालजालान्यपि कालागरुकर्कशान्यभूवन् । तमृते दहनायते स्म राका भगवन्तं क्षितिरप्यभूदधीरा ।

'संततमुसलासङ्गाद्बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥'

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥'

विभावनायां कारणाभावेनोपनिबध्यमानत्वात्कार्यमेव बाध्यत्वेन प्रतीयते । विशेषोक्तौ च कार्यभावेन कारणमेव । इह त्वन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः ।

कार्यकारणयोर्भिन्नदेशतायामसंगतिः ॥ ६८ ॥

यथा—

अहो खलभुजंगस्य विचित्रोऽयंवधक्रमः
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्विमुच्यते

अस्याश्चापवादकत्वादेकदेशस्थयोर्विरोधे विरोधालंकारः ।

गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः ।
यद्वारब्धस्य वैफल्यमनर्थस्य च संभवः ॥ ७० ॥
विरूपयोः संघटना या च तद्विषमं मतम् ।

क्रमेण यथा—

'सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रसूते ॥'

अत्र कारणरूपासिलतायाः 'कारणगुणा हि कार्यगुणमारभन्ते' इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः ।

संचितात्यन्तपापस्य गतस्य गुरुसन्निधौ

स्मृतिगाथाश्रवः कर्णे भृशम्मे दहनायते ।
'अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया ।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः ॥'

अत्र केवलं काङ्क्षितधनलाभो नाभूत्, प्रत्युत क्षारवारिभिर्वदनपूरणम् ।

'क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेन्द्रवन्दिता ।
नियतं प्रतिकूलवर्तिनो बत धातुश्चरितं सुदुःसहम् ॥'
अत्र वनराज्यश्रियोर्विरूपयोः संघटना । इदं मम ।
यथा वा—

'विपुलेन सागरशयस्य कुक्षिणा
भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः
स पुरस्त्रियैकतमयैकया दृशा ॥'

समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः ॥ ७१ ॥

यथा—

'शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिरनुरूपं जन्हुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥'

विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् ।

यथा—

'मरणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान्।
दुःखीयति सुःखहेतोः को मूढः सेवकादन्यः ॥'

आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते ॥ ७२ ॥

आश्रयाधिक्ये यथा—

'किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥'

आश्रिताधिक्ये यथा—

'युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विष-
स्तपोधनाभ्यागमसंभवा मुदः ॥'

अन्योन्यमुभयोरेकक्रियायाः कारणं मिथः।

त्वया सा शोभते तन्वी तया त्वमपि शोभसे।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी ॥'

यदाधेयमनाधारमेकं चानेकगोचरम् ॥७३॥
किंचित्प्रकुर्वतः कार्यमशक्यस्येतरस्य वा।
कार्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ॥ ७४ ॥

क्रमेण यथा—

'दिवमप्युपयातानामाकल्पमनल्पगुणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥'

'कानने सरिदुद्देशे गिरीणामपि कंदरे ।
पश्यन्त्यन्तकसंकाशं त्वामेकं रिपवः पुरः ॥'

'गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥'

व्याघातः स तु केनापि वस्तु येन यथाकृतम् ।
तेनैव चेदुपायेन कुरुतेऽन्यस्तदन्यथा ॥ ७५ ॥

यथा—'दृशा दग्धं मनसिजं–, इत्यादि ।

परं परं प्रति यदा पूर्वपूर्वस्य हेतुता ॥ ७६ ॥
तदा कारणमाला स्यात्

यथा—

श्रुतं कृतधियां सङ्गाज्जायते विनयः श्रुतात् ।
लोकानुरागो विनयान्न किं लोकानुरागतः ॥'

तन्मालादीपकं पुनः
धर्मिणामेकधर्मेण संबन्धो यद्यथोत्तरम् ॥ ७७ ॥

यथा—

'त्वयि संगरसंप्राप्ते धनुषासादिताः शराः
शरैररिशिरस्तेन भूस्तया त्वं त्वया यशः ॥'

अत्रासादनक्रिया धर्मः ।

पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् ।
स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा ॥७८॥

क्रमेणोदाहरणम्—

'सरो विकसिताम्भोजमम्भोजं भृङ्गसंगतम् ।
भृङ्गा यत्र ससंगीताः संगीतं सस्मरोदयम् ॥'

'न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः॥

क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितं च दृश्यते । यथा—

'वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु ।
कमलेषु पतन्त्यलयः करोति संगीतमलिषु पदम् ॥'

एवमपोहनेऽपि ।

उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते ।

यथा—

तृणाल्लघुतरस्तूल स्तूलादपि च याचकः
वायुना किन्न नीतोऽसौ मामयं प्रार्थयेदिति ।
गिरिर्महान् गिरेरब्धि महानब्धे नभो महत्
नभसोऽपि महद्ब्रह्म ततोप्याशा गरीयसी ।

यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ॥ ७९ ॥

यथा—

शत्रुं मित्रं विपत्तिं च जयरंजय भंजय

क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् ।
भवति क्रियते वा चेत्तदा पर्याय इष्यते ॥ ८० ॥

यथा —

प्रायश्चरित्वा वसुधामशेषां छायासु विश्रम्य ततस्तरूणां
प्रौढिंगते सम्प्रति तिग्मभानौ शैत्यं शनैरन्तरपामयासीत् ।

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरिताम् ।

अत्र चैकस्यानेकत्रक्रमेणैव वृत्तेर्विशेषालङ्कारद्भेदः । वि-
निमयाभावात्परिवृत्तेः ।

परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ।

क्रमेणोदाहरणम्—

जग्राह स शरान्मुक्त्वा रिपूणां यशसां श्रियम् ।
ते तु दत्त्वा निजप्राणान् लेभिरेऽकीर्तिसन्ततिम् ॥

अत्र प्रथमेऽर्थे समेन, द्वितीयेऽर्थे न्यूनेन ।

'तस्य च प्रवयसो जटायुषः
स्वर्गिणः किमिव शोच्यतेऽधुना ।
येन जर्जरकलेवरव्यया-
त्क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥'

अत्राधिक्येन ।

प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत् ॥ ८१॥
ताहृगन्यद्व्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ।
परिसंख्या

क्रमेणोदाहरणम्—

'किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥'

अत्र व्यवच्छेद्यं रत्नादि शाब्दम् ।

'किमाराध्यं सदा पुण्यं कश्च सेव्यः सदागमः ।
को ध्येयो भगवान्विष्णुः किं काम्यं परमं पदम् ॥'

अत्र व्यवच्छेद्यं पापाद्यार्थम् । अनयोः प्रश्नपूर्वकत्वम् ।

अप्रश्नपूर्वकत्वे यथा –

'भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥'

'बलमार्तभयोपशान्तये विदुषां संमतये बहु श्रुतम् ।
वसु तस्य न केवलं विभोर्गुणवत्तापि परप्रयोजनम् ॥'

श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा—

'यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराश्चापेषु गुणच्छेदाः—' इत्यादि ।

उत्तरं प्रश्नस्योत्तरादुन्नयो यदि ॥८२ ॥

यच्चासकृदसंभाव्यं सत्यपि प्रश्न उत्तरम् ।

यथा—

'का विसमा देव्वगई, किं लद्धव्वं जणो गुणग्गाही ।
किं सोक्ख सुकलत्तं, किं दुग्गेज्झं खलो लोओ ॥'

अत्रान्यव्यपोहे तात्पर्याभावात्परिसंख्यातो भेदः । न चेदमनुमानम् ।

साध्यसाधनयोर्द्वयोर्निर्देश एव तस्याङ्गीकारात्। न च काव्य लिङ्गम्। उत्तरस्य प्रश्नं प्रत्यजनकत्वात्।

दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ॥८३॥

मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका। अत्र च क्वचित्प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात्प्रकरणिकार्थस्येति द्वौ भेदौ। क्रमेणोदाहरणम्—

यदि ते चरणाम्बुजं हृदा वहतो येन हतोऽविपद्गणः
अथ चण्डकरेण मण्डिते दिनमध्येऽपि जितन्तमोगणैः।
'विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम्।
अतितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम्॥'

अत्र च समानन्यायस्यश्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते हारोऽयं—' इत्यादौ। न चेदमनुमानम्। समानन्यायस्य संबन्धरूपत्वाभावात्।

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः।

यथा—'नमयन्तु शिरांसि धनूंषि वा कर्णपूरीक्रियन्तमाज्ञा मौर्व्यो वा, अत्र शिरसां धनुषां च नमनयोः सन्धिविग्रहोपलक्षणत्वात्, संधिविग्रहयोश्चैकदाकर्तुमशक्यत्वाद्विरोधः। स चैक-

पन्नाश्रयणपर्यवसानः। तुल्यबलत्वं चात्र धनुः शिरोनमनयोर्द्वयोरपि स्पर्धया संभाव्यमानत्वात्। चातुर्यं चात्रौपम्यगर्भत्वेन। एवं 'कणं पूरीक्रियन्ताम्' इत्यत्रापि। एवं 'युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः'। अत्र श्लेषावष्टम्भेन चारुत्वम्।

'दीयतामर्जितं वित्तं देवाय ब्राह्मणाय वा।'

इत्यत्र चातुर्याभावान्नायमलंकारः।

समुच्चयोऽयमेकस्मिन्सति कार्यस्य साधके॥ ८४॥
खलेकपोतिकान्यायात्तत्करः स्यात्परोऽपि चेत्।

यथा—

शीरं ज्ञानजननं गेगो विष्णुस्मृतिपुरः
विपद्वैराग्यजननी त्रयं सुखकरं सताम्।

सदसद्योगः।

'कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥'

'धुनोति चासिं तनुते च कीर्तिम्।'

इत्यादावेकाधिकरणेऽप्येष दृश्यते। न चात्र दीपकम्। एते हि गुणक्रियायौगपद्ये समुच्चयप्रकारा नियमेन कार्यकारणकालनियमविपर्ययरूपातिशयोक्तिमूलाः। दीपकस्य चातिशयोक्तिमूलत्वाभावः।

समाधिः सुकरे कार्ये दैवाद्वस्त्वन्तरागमात् ।

यथा—

चेदिराज द्विषो हन्तुं खड्गस्ते यावदुद्गतः
तेषाम्मनसि भीरुत्वं प्राणहारि समुत्थितम् ।

प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि ॥ ८६ ॥
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ।

जितमौक्तिकसंपदां रदानां
सहवासेन परां मुदन्ददानां
विरसादधरीकरोति तासा-
मधुना साहसशालि मौक्तिकन्तो ।

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ॥ ८७ ॥
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ।

क्रमेण यथा—

'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं'-इत्यादि ।
'तद्वक्त्रं यदि मुद्रिता शशिकथा हा हेम सा चेद्द्युति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत्स्मितं का सुधा ।
धिक्कंदर्पधनुर्भ्रुवौ यदि च ते किं वा बहु ब्रूमहे
यत्सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥'

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात्तेषां निष्फलत्वम् ।

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ॥ ८८ ॥
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ।

यथा—

'अहमेव गुरुः सुदारुणाना-
मिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन्वचनानि दुर्जनानाम् ।'

अत्र प्रथमपादेनोत्कर्षातिशय उक्तः । तदनुक्तौ तु नायमलंकारः । यथा—'ब्रह्मेव ब्राह्मणो वदति, इत्यादि ।

सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः ।

यथा—

रत्नस्तम्भेषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
लङ्केश्वरः सभामध्ये न ज्ञातो वालिसूनुना ॥

तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः ॥ ९० ॥

यथा—

जगाद वदनच्छद्मपद्मपर्यन्तपातिनः ।
नयन्मधुलिहः श्वैत्यमुदंग्रदशनांशुभिः ॥'

मीलिते प्रकृतस्य वस्तुनो वस्त्वन्तरेणाच्छादनम् । इह तु वस्त्वन्तरगुणेनाक्रान्तता प्रतीयत इति भेदः ।

तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः ।

यथा—

'हन्त सान्द्रेण रागेण भृतेऽपि हृदये मम ।
गुणगौर निषण्णोऽपि कथं नाम न रज्यसि ॥'

यथा वा—

'गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥'

पूर्वत्रातिरक्तहृदयसंपर्कात्प्राप्तवदपि गुणगौरशब्दवाच्यस्य नायकस्य रक्तत्वं न निष्पन्नम् । उत्तरत्राप्रस्तुतप्रशंसायां विद्यमानायामपि गङ्गायमुनापेक्षया प्रकृतस्य हंसस्य गङ्गायमुनयोः संपर्केऽपि न तद्रूपता । अत्र च गुणाग्रहणरूपविच्छित्तिविशेषाश्रयाद्विशेषोक्तेर्भेदः । वर्णान्तरोत्पत्त्यभावाच्च विषमात् ।

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा ॥ ८१ ॥
कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ।

सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः । अत्राकारेण यथा—

धूतजांगलिकाकारं विदित्वा दूतमात्मनः
चक्षुश्चालनतो मंत्री त्वं ज्ञातोऽसीत्यमूचयत् ।

व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः ॥८२॥

यथा—

रणप्रयाते त्वयि खड्गहस्ते तूर्णं भयार्त्ते रिपवः प्रणेमुः
पश्चाद्भूतोत्साहतया ग्रहीतुं शस्त्रमतो नूनमिति व्यशंसन् ।

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।

दुरूहयोः कविमात्रवेद्ययोरर्थस्य डिम्भादेः स्वयोस्तदेकाश्रययोश्चेष्टास्वरूपयोः । यथा मम—

'लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन्विक्रमेण ।
स्फूर्जद्धुङ्कारघोषः प्रतिदिशमखिलान्द्रावयन्नेव जन्तू-
न्कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ॥'

अद्भुतस्य पदार्थस्य भूतस्याथभविष्यतः ॥ ९३ ॥
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ।

यथा—

'मुनिर्जयति योगीन्द्रो महात्मा कुम्भसंभवः ।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥'

यथा वा—

'आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥'

न चायं प्रसादाख्यो गुणः । भूतभाविनोः प्रत्यक्षायमाणत्वे तस्याहेतुत्वात् । न चाद्भुतो रसः । विस्मयं प्रत्यस्य हेतुत्वात् । न चातिशयोक्तिरलंकारः । अध्यवसायाभावात् । न च भ्रान्तिमान् । भूतभाविनोर्भूतभावितयैव प्रकाशनात् । न च स्वभावोक्तिः । तस्य लौकिकवस्तुगतसूक्ष्मधर्मस्वभावस्यैव यथावद्वर्णनं स्वरूपम् । अस्य तु वस्तुनः प्रत्यक्षायमाणत्वरूपो विच्छित्तिविशेषोऽस्तीति ।

यदि पुनर्वस्तुनः क्वचित्स्वभावोक्तावप्यस्या विच्छित्तेः संभव-स्तदोभयोः संकरः ।

'अनातपत्रोऽप्ययमत्र लक्ष्यते
सितातपत्रैरिव सर्वतो वृतः ।
अचामरोऽप्येष सदैव वीज्यते
विलासबालव्यजनेन कोऽप्ययम् ॥'

अत्र प्रत्यक्षायमाणस्यैव वर्णनान्नायमलंकारः । वर्णनावशेन प्रत्यक्षायमाणत्वस्यास्य सरूपत्वात् । यत्पुनरप्रत्यक्षायमाणस्यापि वर्णने प्रत्यक्षायमाणत्वं तत्रायमलंकारो भवितुं युक्तः । यथोदाहृते 'आसीदञ्जनम्—' इत्यादौ ।

लोकातिशयसंपत्तिवर्णनोदात्तमुच्यते ॥ ९४ ॥
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ।

क्रमेणोदाहरणम्—

'अधः कृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् ।
ज्योत्स्नानिपातात्क्षरतां पयोभिः केलीवनं वृद्धिमुरीकरोति ॥'
'नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥'

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ॥ ९५ ॥
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा ।
रसवत्प्रेय ऊर्जस्वि समाहितमिति क्रमात् ॥ ९६ ॥

तदाभासौ रसाभासो भावाभासश्च। तत्र रसयोगाद्रसवद्-लंकारो यथा—मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।

येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

अत्रदेवताविषयकरतिभावस्याद्भुतरसोऽङ्गम् इत्यादि ।

एवमन्यत्रापि । प्रकृष्टप्रियत्वात्प्रेयः । यथा

कदा वाराणस्याममरतटिनीरोधसिवसन्

वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटं

अयेगौरीनाथ त्रिपुरहर शंभो त्रिनयन ।

प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥

शान्तरसस्य चिन्ताख्यो व्यभिचारिभावोऽङ्गम्

ऊर्जोबलम्, अनौचित्यप्रवृत्तौ तदत्रास्तीत्यूर्जस्वि । यथा—

त्वयि लोचनगोचरंगते सफल जन्म नृसिंहभूपते

अजनिष्ट ममेतिसादर युधिविज्ञापयति द्विषां गणः ।

प्रभुविषयस्य रतिभावस्य तद्विषयद्विषद्गणरतिरूपो भावा-भासोऽङ्गम् ।

एव रसाभासोऽपि । समाहितं परीहारः । यथा—

'अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।

ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥'

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम् ।

भावस्य चोदये संधौ मिश्रत्वे च तदाख्यकाः ।

तद्वाच्यका भावोदयभावसंधिभावशबलनामानोऽलंकाराः। दिङ्मात्रं यथा–

'मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः।
श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विषमां दशाम् ॥'

अत्र त्रासादयो राजविषयरतिभावस्याङ्गम्। इह केचिदाहुः–'वाच्यवाचकरूपालंकरणमुखेन रसाद्युपकारका एवालंकाराः। रसादयस्तु वाच्यवाचकाभ्यामुपकार्या एवेति न तेषामलंकारता भवितुं युक्ता' इति। अन्ये तु–'रसाद्युपकारमात्रेणेहालंकृतिव्यपदेशो भाक्तश्चिरंतनप्रसिद्ध्याङ्गीकार्य एव' इति। अपरे च–'रसाद्युपकारमात्रेणालंकारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधानम्, अजागलस्तनन्यायेन' इति। अभियुक्तास्तु–'स्वव्यञ्जकवाच्यवाचकाद्युपकृतैरङ्गभूतैरसादिभिरङ्गिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलंकृतिव्यपदेशो लभ्यते। समासोक्तौ तु नायिकादिव्यवहारमात्रस्यैवालंकृतिता, न त्वास्वादस्य, तस्योक्तरीतिविरहात्' इति मन्यन्ते। अत एव ध्वनिकारेणोक्तम्–

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥'

यदि च रसाद्युपकारमात्रेणालंकृतित्वं तदा वाचकादिष्वपि

तथा प्रसङ्ग्येत। एवं च यच्च कैश्चिदुक्तम्—'रसादीनामङ्गित्वे रसवदाद्यलंकारः। अङ्गत्वे तु द्वितीयोदात्तालंकारः', तदपि परास्तम्।

यद्येत एवालंकाराः परस्परविमिश्रिताः ॥ ८७ ॥
तदा पृथगलंकारौ संसृष्टिः संकरस्तथा।

यथा लौकिकालंकाराणामपि परस्परमिश्रणे पृथक्चारुत्वेन पृथगलंकारत्वं तथोक्तरूपाणां काव्यालंकाराणामपि परस्परमिश्रत्वे संसृष्टिसंकराख्यौ पृथगलंकारौ। तत्र

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ॥ ८८ ॥

एतेषां शब्दार्थालंकाराणाम्। यथा—

'देवः पायादपायान्नः स्मेरेन्दीवरलोचनः।
संसारध्वान्तविध्वंसहंसः कंसनिषूदनः॥'

अत्र पायादपायादिति यमकम्। संसारेत्यादौ चानुप्रास इति शब्दालंकारयोः संसृष्टिः। द्वितीये पादे उपमा, द्वितीयार्धे च रूपकमित्यर्थालंकारयोः संसृष्टिः। एवमुभयोः स्थितत्वाच्छब्दार्थालंकारसंसृष्टिः।

अङ्गाङ्गित्वेऽलंकृतीनां तद्वदेकाश्रयस्थितौ।
संदिग्धत्वे च भवति संकरस्त्रिविधः पुनः॥ ८९ ॥

अङ्गाङ्गिभावो यथा—

‘आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले ॥’

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् । श्लेषश्च पादमूलवेष्टनमेव । चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च मन्थव्यथाव्युपशमार्थमिवेत्युत्प्रेक्षाया अङ्गम् । उत्प्रेक्षा चाम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् ।

यथा वा—

‘अनुरागवती संध्या दिवसस्तत्पुरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥’

अत्र समासोक्तिर्विशेषोक्तेरङ्गम् । संदेहसंकरो यथा—

‘इदमाभाति गगने भिन्दानं संततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥’

अत्र किं मुखस्य चन्द्रतयाध्यवसानादतिशयोक्तिः, उत इदमिदमिति मुखं निर्दिश्य चन्द्रत्वारोपान्मुखम्, अथवा इदमिति

मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसंबन्धा-त्तुल्ययोगिता, आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकम्, किं वा विशे-षणसाम्यादप्रस्तुतस्य मुखस्य गम्यत्वात्समासोक्तिः, यद्वाप्रस्तु-तचन्द्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा, यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलंकाराणां संदेहात्संदेहसंकरः।

यथा वा—'मुखचन्द्रं पश्यामि' इत्यत्र किं मुखं चन्द्र इत्यु-पमा, उत चन्द्र एवेति रूपकमिति संदेहः। साधकबाधकयोर्द्व-योरेकतरस्य सद्भावे न पुनः संदेह। यथा—'मुखचन्द्रं चुम्बति' इत्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकम्। चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम्। 'मुखचन्द्रः प्रकाशते' इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधको मुखे उपचारितत्वेन संभ-वतीति नोपमाबाधकः। एवं चात्रमयूरव्यंसकादित्वाद्रूपक समास एव।

एकाश्रयानुप्रवेशो यथा—

स्पष्टोच्छ्वसत्किरणकेसरसूर्यबिम्बविस्तीर्णकर्णिकमथो दिवसार-विन्दम्। श्लिष्टाष्टदिग्दलविभागमुखावतारबद्धान्धकारमधुपावलिं संचुकोच॥

अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ।

यथा वा—'संसारध्वान्तविध्वंस-' इत्यत्र रूपकानुप्रासयोः।

यथा वा—'कुरबका रवकारणतां ययुः' इत्यत्र रवका रवका इत्येकं वकार-वकार इत्येकमिति यमकयोः ।

यथा वा—

'अहिणअपओअरसिएसु पहिअसामाइएसु दिअहेसु ।
रहसपसारिअगीआण णच्चिअं मोरविन्दाणम् ॥'

अत्र 'पहिअसामाइएसु' इत्येकाश्रये पथिकश्यामायितेत्युपमा । पथिकसामाजिकेष्विति रूपक मविष्टमिति ।

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य ।
साहित्यतत्त्वमखिलं सुखमेव वित्त ॥ १०० ॥

यावत्प्रसन्नेन्दुनिभानना श्रीर्नारायणस्याङ्कमलंकरोति ।
तावन्मनः संमदयन्कवीनामेष प्रबन्धः प्रथितोऽस्तु लोके ॥

इति साहित्यदर्पणे अलङ्कारनिरूपणो नाम दशमः परिच्छेदः ।
समाप्तश्चायं प्रबन्धः ।

गुरुकुल ग्रन्थावली

अत्रत्यस्सर्वत्रैव बालोपयोगिनां लघुपुस्तकानामपेक्षा ऽनुभूयते, तामेवापेक्षां पूरयितुं बालोपयोगीनि पुस्तकानि स्थूलाक्षरैरुत्तमपत्रेषु गुरुकुलेन प्रकाश्यन्ते। इमानि पुस्तकानि सर्वेषु ...द्यालयेषु संस्कृते प्रवेशमिच्छतां विद्यार्थिनां हस्तेषु निश्शंकं ...तुं शक्यन्ते।

साहित्य ग्रन्थमाला।

१. संस्कृतप्रवेशिका (संस्कृते प्रवेशमिच्छतां बालानाम न्येषामप्युपकारिका) ... ... मूल्य ।)

२. संस्कृत प्रथम पुस्तकम् =)

३. संस्कृत साहित्य पाठावलिः द्वितीय भागः =)

४. बालनीति कथा माला (अस्यां बालोपयोगिन्यो मनोरञ्जकाश्च कथाः पञ्चतन्त्रादुद्धृताः) ... ≡)

५. आर्य्यसूक्तिसुधा ... ... ।)

६. काव्यलतिका (अत्र भारविमाघादीनां

७. संक्षिप्त वैदिक मनुस्मृति—श्री म० मुन्शीराम ≡)

गवर्नर गुरुकुल, द्वारा संगृहीत तथा सम्पादित ।।)

८. संशोधित पंचतन्त्रम् १ म भागः तन्त्रद्वयम् ।।-)

९. संशोधित पंचतन्त्रम् २ य भागः शेषं तंत्रयम् ।=)

१०. संशोधित हितोपदेशः ।=)

व्याकरण ग्रन्थमाला

१. महाभाष्यम् ''अङ्गाधिकारः-श्रीमत्पतञ्जलिमुनिना प्रणीतम् महामहोपाध्याय श्री कैय्यटरचितप्रदीपेन व्याख्यायितम् २॥)
२. धातुपाठ मूल महर्षिपाणिनि प्रणीतम् .... ।)
३. अष्टाध्यायी, सरल संस्कृत टीका सहित (पूर्वार्द्धम्)
४. अष्टाध्यायी, सरल संस्कृत टीका सहित (उत्तरार्द्धम्)॥
५. अष्टाध्यायी—मूल ....
६. नामिकः .... =)
७. आख्यातिक... .... ॥)

पुस्तक मिलने का पता—

मुख्याधिष्ठाता,

गुरुकुल विश्वविद्यालय कांगड़ी डाकखाना गुरुकुल कांगड़ी
जि० बिजनौर

१०) से २५) रु० तक की पुस्तक लेने वालों को १०) रु० सैकड़ा तथा इस से अधिक लेने वालों को १५) रु० सैकड़ा कमीशन दिया जायेगा।